पतिते वास्ति सन्देहः, सम्यग् ज्ञात्वा निगद्यताम् ॥ १३५

आद्ये तु जङ्घया रुद्धे, नावकाशः क्वचिद्भवेद् ।
पतिते चेतनाऽभावात्, कुतोऽभूद्वक्त्रसम्भवः ॥ १३६

सर्वेषामेव देवानां, मूर्त्तिद्वारेण वेश्यते ।
अपद्वारेण चेशस्य, कारणं तद्विचार्यताम् ॥ १३७

वह्निर्वसति तन्नेत्रं, मूर्त्तावीशस्य विद्यते ।
लिङ्गस्य दृश्यमानस्य, प्रणामः किं पराङ्मुखः ? ॥ १३८

अप्रस्ताव इति ज्ञात्वा, चेत् पार्श्वे क्रियते नतिः ।
युगान्तं तत्र निरतः, फलं किं दास्यते शिवः ? ॥ १३९

यादृशो जायते देव-स्तादृशी धूपवेलिका ।
ईशस्य यादृशी मूर्तिः, प्रणामस्तादृगेव हि ॥ १४०

न शिवो बलवान् किन्तु, तपो हि बलवत्तरम् ।
पश्यतां यद्बलाद् गौर्या, शिवश्चक्रे स्वकिङ्करः ॥ १४१

उक्तं च कुमारसम्भवे -
अद्यप्रभृत्यवनताङ्गि ! तवास्मि दासः,
क्रीतस्तपोभिरिति वादिनि चन्द्रमौलौ ।

अह्लाय सा नियमजं क्लममुत्ससर्ज,
क्लेशः फलेन हि पुनर्नवतां विधत्ते ॥ १४२

सर्वेषामपि देवानां, कन्दर्पो बलवत्तरः ।
येन नाट्यं शिवो देवो, दग्धेनापि हि कारितः ॥ १४३

कुमारसम्भवे-
पशुपतिरपि तान्यहानि कृच्छ्रा-दगमयदद्रिसुतासमागमोत्कः ।
कमपरमवशं न विप्रकुर्युर्विभुमपि तं यदमी स्पृशन्ति भावाः॥१४४

पुनस्तत्रैव उक्तम्-
समदिवसनिशीथं सङ्गिनस्तत्र शम्भोः,
शतमगमदृतूनां साग्रमेका निशेव ।
न च विषयसुखेषु च्छिन्नतृष्णो बभूव,
ज्वलन इव समुद्रान्तर्गतस्तज्जलौघैः ॥ १४५

वह्निना क्षोभितः पश्चादपि वीर्यं मुमोच सः ।
तन्मुखे तेन च त्यक्तं, गङ्गायामसहिष्णुना ॥ १४६

स्नान्तीनां तत्र सरिति, प्रविष्टं कृत्तिकोदरे ।
षड्भिर्भागैः(र्मासैः) सुतो जातः, स षण्मुख इति स्मृतः ॥१४७

नानाविगोपकैरेवं, सुतः सम्पूर्णतां गतः ।
तेनापि षष्टिदिवसे, तारकाख्यो निपातितः ॥ १४८

पालकः कथ्यते विष्णुः, प्रत्यक्षं शत्रुरूपभाक् ।
बलिना सुखितं लोकं, यो न सेहे ह्यमर्षणः ॥ १४९

प्रलयस्थितिसर्गाणां, हेतुर्देवत्रयी मता ।
ज्ञानं च समभूत्तस्य, न वेति प्रतिपाद्यताम् ॥ १५०

ज्ञानं चेत्तर्हि दैत्याली, स्वानर्थाय कथं कृता ? ।
पालिता संहृता चेति, पश्यतां बालवल्गितम् ॥ १५१

नग्नाचार्यप्रवेशाभो, देवत्रितयमेलकः ।
एकस्य मुख्यता कार्य–योगादन्यस्य लाघवम् ॥ १५२

एकैव मूर्त्तिर्बिभेदे त्रिधासौ, न वाक्यमेतद् घटनामुपैति ।
हरेर्विरञ्चेर्न पुरा विवादो, वृद्धत्वहेतोर्भवता श्रुतः किम् ? ॥१५३

पुराणे श्रूयते नार्यः, पूर्वमासन्निरर्गलाः ।
ये ताभिस्तनया जाता–स्ते कस्य कुलदीपकाः ॥ १५४

क्षयाहं कस्य कुर्वन्तु ?, यच्छन्तु च जलाञ्जलिम् ? ।
श्राद्धं च कस्य वै नित्यं ?, विचार्यार्यैर्निगद्यताम् ॥ १५५

औद्दालकेः श्वेतकेतो–र्ये पूर्वमभवन् द्विजाः ।
स्वैरिणीभिश्च ये जाताः, कस्तेषां कुलजो मदः ? ॥ १५६

यतो भारते–

अनावृताः स्ववर्णेषु, सर्वसाधारणाः पुरा ।
नार्यो बभूवुर्निर्वैरो, यतः सर्वोऽभवज्जनः ॥ १५७

औद्दालकेः श्वेतकेतुर्विजने वीक्ष्य मातरम् ।
करेण नेतुमाकृष्टा–मपूर्वेण द्विजन्मना ॥ १५८

कुपितो विदधे स्त्रीणा–मेकपत्नीव्रतस्थितिम् ।
पत्युश्च शासनात्तासां, न दोषः परसङ्गमे ॥ १५९

भर्त्तुः कल्माषपादस्य, दमयन्ती पुरा सती ।
आज्ञया तनयं लेभे, वशिष्ठादश्मकाभिधम् ॥ १६०

एषा पाण्डोः शिक्षा कुन्तीं प्रतिश्लोकाः ॥ ४

उक्तं च दर्पदलने –

अनादाविह संसारे, दुर्वारे मकरध्वजे ।
कुले च कामिनीमूले, का जातेः परिकल्पना ? ॥ १६१

कुलस्य कमलस्येव, मूलमन्विष्यते यदि ।
दोषपङ्कप्रसक्तोऽन्तस्तदवश्यं प्रदृश्यते ॥ १६२

एकश्चेत् पूर्वपुरुषः, कुले यज्वा बहुश्रुतः ।
अपरः पापकृन्मूर्खः, कुलं कस्यानुवर्त्तते ॥ १६३

कुलाभिमानाभरणस्य माता, पितामही वा प्रपितामही वा ।
योषित् स्वभावेन यदि प्रवृत्ता,
तदेष दोषः कुलमूलकाषः ॥ १६४

कुलाभिमानः कस्तेषां, जघन्यस्थानजन्मनाम् ।
कुले कुलङ्कषा येषां, जघन्या निम्नगा स्त्रियः ॥ १६५

नैषधे–

शुद्धिर्वंशद्वयी शुद्धौ, पित्रोः पित्रोर्यदेकशः ।
तदनन्तकुला दोषा–ददोषा जातिरस्ति का ? ॥ १६६

कुलाभिमानिभिर्वार्ता, छन्दोदेवस्य न श्रुता ।
यस्यां च श्रुतमात्रायां, प्रयाति कुलजो मदः ॥ १६७

पुरा हि नारदस्याग्रे, द्रौपद्या सत्यपञ्चकम् ।
यदाख्यायि तदेवापि, श्रुतमप्यश्रुतीकृतम् ॥ १६८

यतः–

सुरूपाः पञ्च योद्धारः, पाण्डवाः पतयो मम ।
तथापि कुरुते वाञ्छां, मनः षष्ठेऽपि नारद ! ॥ १६९

रहो नास्ति क्षणो नास्ति, नास्ति प्रार्थयिता नरः ।
तेन नारद ! नारीणां, सतीत्वमुपजायते ॥ १७०

सुरूपं पुरुषं दृष्ट्वा, पितरं भ्रातरं सुतम् ।
मनश्चलति नारीणा–मेतत्सत्यं हि नारद ! ॥ १७१

नारीणां न प्रियः कश्चि – न्न च द्वेष्योऽपि कश्चन ।
गावस्तृणमिवारण्ये, जिघत्सन्ति नवं नवम् ॥ १७२

अग्निकुण्डसमा नारी, घृतकुण्डसमो नरः ।
तेन नारद ! नारीणां, संयोगं परिवर्जयेत् ॥ १७३

वेदस्मृतिपुराणेषु, श्रुत्वा स्त्रीणां कुशीलताम् ।
अनुभूय स्वयमपि, मदं कुर्वन्ति किं जडाः ? ॥ १७४

अनादावत्र संसारे, तिस्रः साद्‌र्धाः पतिव्रताः ।
शेषास्तद्विपरीतास्तु, कः कुलस्य कदाग्रहः ? ॥ १७५

यतः सप्तर्षिभिः प्रोक्तम् –
उच्छ्रितानि पतितानि, पतितान्युच्छ्रितानि च ।
कुलाध्ययनवृत्तानि, मया दृष्टान्यनेकशः ॥ १७६

अधीत्य चतुरो वेदान्, साङ्गोपाङ्गान् सलक्षणान् ।
शुद्रात् प्रतिग्रहं कृत्वा, खरो भवति ब्राह्मणः ॥ १७७

खरो द्वादशजन्मानि, षष्टिजन्मानि, शूकरः ।
श्वानः सप्ततिजन्मानि, इत्येवं मनुरब्रवीत् ॥ १७८

प्रकृत्या कर्म्मणा चापि, द्विधाः शुद्राः प्रकीर्त्तिताः ।
कर्म्मणा वणिजः शुद्राः, प्रकृत्या वा निगद्यताम् ॥ १७९

शुद्राँश्च कुर्वतां वैश्यान्, वैश्यान् शुद्रान् प्रकुर्वताम् ।
अपूर्वं सृष्टिकर्तृत्वं, गूर्जरत्राद्विजन्मनाम् ॥ १८०

प्रत्यक्षं कारवश्चौराः, स्वर्णकारादयो मताः ।
वैश्यास्ते हेतुना केन, शुद्राश्च वणिजः कथम् ? ॥ १८१

भारते-

वैश्यस्य सततं धर्मः, पाशुपाल्यं कृषिस्तथा ।
अग्निहोत्रपरिस्पन्दो-ऽवेदाध्ययनमेव च ॥ १८२

वणिजां सत्पथस्थान-मातिथ्यं प्रशमो दमः ।
विप्राणां स्वागतं त्यागो, वैश्यधर्म्मः सनातनः ॥ १८३

तिलान् गन्धान् रसाँश्चैव, विक्रीणीत न वै क्वचित् ।
वणिक्पथसमासीनो, वैश्यः सत्पथमावसन् ॥ १८४

भीष्मवाक्यम्-

पूर्वैः स्थानानि दत्तानि, द्विजानां वासहेतवे ।
तन्निर्वाहकृतो वैश्याः, शूद्रा वा सम्यगुच्यताम् ॥ १८५

यदि शूर्दास्ततस्तेषां, ग्रहणात्पतिता द्विजाः ।
वैश्या वा तर्हि तद्वंश्यैः, शूद्रत्वं कथमर्जितम् ॥ १८६

अथ-

त एव शूद्रा ये जैनाः, कदाचिदिति वो मतिः ।
तर्हि ये भवतां भक्ता-स्तेषां वेश्मसु भुज्यताम् ॥ १८७

तथा च- भारते शिवो गौरीं प्रत्याह-

शूद्रान्नं गर्हितं देवि !, दिवि देवैर्महात्मभिः ।
पितामहमुखोत्सृष्टं, प्रमाणमिति मे मतिः ॥ १८८

ये शूद्रार्थमुपादाय, अग्निहोत्रमुपासते ।
ऋत्विजोऽपि हि शूद्रास्ते, ब्राह्मणादिषु गर्हिताः ॥ १८९

न यज्ञार्थं क्वचिच्छूद्रा-द्विप्रो भिक्षेत कुत्रचित् ।
यजमानो हि भिक्षित्वा, चाण्डालः प्रेत्य जायते ॥ १९०

शूद्रादादाय निर्वापं, ये पचन्ति द्विजातयः ।
ते यान्ति नरकं घोरं, ब्रह्मतेजोविवर्जिताः ॥ १९१

शूद्रान्नं शूद्रसम्पर्कं, शूद्रेण च सहासनम् ।
शूद्राज्ज्ञानागमो वापि, स्वर्गस्थमपि पातयेत् ॥ १९२

शूद्रान्नेनावशेषेण, जठरे यो म्रियेद् द्विजः ।
आहिताग्निस्तथा यज्वा, स शूद्रगतिभाग्भवेत् ॥ १९३

पुनस्तत्रैव-

एकवर्णमिदं सर्वं, पूर्वमासीद्युधिष्ठिर ! ।
क्रियाकर्मविभेदेन, चातुर्वर्ण्यं व्यवस्थितम् ॥ १९४

पुनः श्रूयते च-

प्रविष्टे भैरवीचक्रे, सर्वे वर्णा द्विजातयः ।
उत्थिते भैरवीचक्रे, सर्वे वर्णाः पृथक् पृथग् ॥ १९५

शूद्रोपि शीलसम्पन्नो, गुणवान् ब्राह्मणो भवेत् ।
ब्राह्मणस्तु क्रियाहीनः, शूद्रापत्यसमो भवेत् ॥ १९६

सद्यः पतति मांसेन, लाक्षया लवणेन च ।
त्र्यहेण शूद्रीभवति, ब्राह्मणः क्षीरविक्रयी ॥ १९७

सर्वजातिषु चाण्डालाः, सर्वजातिषु ब्राह्मणाः ।
ब्राह्मणेष्वपि चाण्डालाश्चाण्डालेष्वपि ब्राह्मणाः ॥ १९८

असच्छूद्रा अशूद्राश्च, कल्पनेयं कृता वृथा ।
ग्रन्थे तल्लक्षणश्रेणिः, क्वापि सन्दर्श्यतां ततः ॥ १९९

यतः-

न क्षत्रियैर्भाति पुरं मनोज्ञं, न ब्राह्मणैः कारुजनैर्घनैर्न ।
तदेव रम्यं नृपतिः स एव, महाजनो यत्र वसत्यनन्तः ॥२००

भारते-

न योनिर्नापि संस्कारो, न श्रुतिर्नापि सन्ततिः ।
कारणानि द्विजत्वस्य, वृत्तमेव तु कारणम् ॥ २०१

ब्रह्मस्वभावः कल्याणि !, समः सर्वत्र दृश्यते ।
निर्मलं सकलं ब्रह्म, यत्र तिष्ठति स द्विजः ॥ २०२

न दर्भव्यग्रपाणिस्तु, न कमण्डलुसूचितः ।
न धौतवसनं बिभ्रज्जातो नग्नस्तु केवलम् ॥ २०३

ब्रह्मबीजं तदाप्यासीत्, संस्काराच्च नतिः पुनः ।
कथमेतदुक्तं वाक्यं, ब्रह्मबीज ! नमोऽस्तु ते ॥ २०४

ब्राह्मणा मुखतो जाता, ब्राह्मण्यस्तु कुतोऽभवन् ।
यद्येकत्र ततो यामिः, सङ्गस्तेषां न युज्यते ॥ २०५

चेत्पृथग्वर्णसम्भूतास्ततोऽभूद्वर्णसङ्करः ।
वर्णसङ्करजातानां, ब्राह्मण्यं गतमेव वै ॥ २०६

ये नीचस्थानतो जाता, योनौ कुर्वन्तु ते रतिम् ।
ये पवित्रान्मुखाज्जाता-स्तेषां तत्र रतिं कुतः ? ॥ २०७

एकस्मात् स्थानतो जन्मक्रियाः षष्ठ्यादिकाः समाः ।
पश्चात् तन्तुत्रयोत्क्षिप्ते, द्विजोऽहमिति किं मदः ? ॥ २०८

वेदार्हा ब्राह्मणाः केन, ब्राह्मण्यस्तु कुतो नहि ? ।
ताभिर्जातास्तु ये तेषां, वेदानां योग्यता कुतः ? ॥ २०९

वेदान्तेऽप्युक्तम् –

ब्राह्मणस्य च देहोऽयं, नोपभोगाय जायते ।
इह क्लेशाय महते, प्रेत्यानन्तसुखायते ॥ २१०

शौचाचाररता विप्रा, बन्धुभ्योऽपि स्पृशन्ति न ।
मन्यन्तस्तातसन्देहं, कुलान्माद्यन्ति चाधिकम् ॥ २११

द्विजानां लक्षणं ब्रह्म, तच्च क्वापि न दृश्यते ।
ततस्तेन विहीनानां, ब्राह्मण्यं नामधारकम् ॥ २१२

उक्तं च भारते–

मृगो दारुमयो यद्वद्, यद्वच्चर्ममयो गजः ।
ब्राह्मणस्तु क्रियाहीनस्तथा वै नामधारकः ॥ २१३

ब्राह्मणो ब्रह्मचर्येण, यथा शिल्पेन शिल्पिकः ।
अन्यथा नाममात्रं स्या–दिन्द्रगोपककीटवत् ॥ २१४

तत्रैव सर्प्पप्रश्ने–

विद्धि भोगीन्द्र ! तं शूद्रं, यो रौद्रश्चारुवृत्तमुक् ।
दुर्वृत्ता यान्ति शूद्रत्वं, त्रिवेदवेदिनोऽपि हि ॥ २१५

तथा–

सत्यं शौचं तपः शौचं, शौचमिन्द्रियनिग्रहः ।
सर्वभूतदया शौचं, जलशौचं च पञ्चमम् ॥ २१६

मुक्त्वा शौचचतुष्कं च, द्विजैः पञ्चममादृतम् ।
स्नानादाचमनाच्छुद्धिं, प्रकुर्वद्भिर्दिने दिने ॥ २१७

यत उक्तम् –
मृदो भारसहस्रेण, जलकुम्भशतेन च ।
न शुद्ध्यन्ति दुराचाराः, स्नातास्तीर्थशतैरपि ॥ २१८

कामरागमदोन्मत्ता, ये च स्त्रीवशवर्त्तिनः ।
न ते जलेन शुद्ध्यन्ति, स्नातास्तीर्थशतैरपि ॥ २१९

नोदकक्लिन्नगात्रोऽपि, स्नात इत्यभिधीयते ।
स स्नातो यो व्रतस्नातः, स बाह्याभ्यन्तरे शुचिः ॥ २२०

तत्र तत्र कुरुक्षेत्रं, तत्र तत्र त्रिपुष्करम् ।
निगृहीतेन्द्रियग्रामो, यत्रोपविशते मुनिः ॥ २२१

संवत्सरेण यत्पापं, कुरुते मत्स्यबन्धकः ।
एकाहेन तदाप्नोति, अपूतजलसङ्ग्रही ॥ २२२

उक्तं शिवधर्मोत्तरे–
लुतास्यतन्तुगलितै–कविन्दौ सन्ति जन्तवः ।
सूक्ष्मा भ्रमरमानास्ते, नैव मान्ति त्रिविष्टपे ॥ २२३

स्मृतावप्युक्तम्–
विंशत्यङ्गुलमानं तु, त्रिंशदङ्गुलमायतम् ।
तद्वस्त्रं द्विगुणीकृत्य, दयावान् गालयेज्जलम् ॥ २२४

तस्मिन् वस्त्रे स्थितान् जीवान्, स्थापयेज्जलमध्यतः ।
एवं कृत्वा पिबेत्तोयं, स याति परमां गतिम् ॥ २२५

यः कुर्यात् सर्वकार्याणि, वस्त्रपूतेन वारिणा ।
स मुनिः स महासाधुः, स योगी स महाव्रती ॥ २२६

चित्तं रागादिभिः शुद्धं, वचनं सत्यभाषणैः ।
ब्रह्मचर्यादिभिर्गात्रं, शुद्धो गङ्गां विनापि सः ॥ २२७

परदारपरद्रोहपरद्रव्यपराङ्मुखः ।
गङ्गाप्याह कुतोऽप्येत्य, मामयं पावयिष्यति ॥ २२८

जङ्गमं स्थावरं चैव, द्विविधं तीर्थमुच्यते ।
जङ्गमं ऋषयस्तीर्थं, स्थावरं तैर्निषेवितम् ॥ २२९

उक्तं च भारते–
ज्ञानपालिपरिक्षिप्ते, ब्रह्मचर्यदयाम्भसि ।
स्नात्वाऽतिविमले तीर्थे, पापपङ्कापहारिणि ॥ २३०

ध्यानाग्नौ जीवकुण्डस्थे, दममारुतदीपिते ।
असत्कर्मसमित्क्षेपैरग्निहोत्रं कुरूत्तमम् ॥ २३१

अगाधे विमले शुद्धे, सत्यशीलशमे हृदि ।
स्थातव्यं जङ्गमे तीर्थे, ज्ञानार्जवदयापरैः ॥ २३२

आचारवस्त्राञ्चलगालितेन, सत्यप्रसन्नक्षमशीतलेन ।
ज्ञानाम्बुना स्नाति च यो हि नित्यं,
किं तस्य भूयात् सलिलेन कृत्यम् ? ॥ २३३

न मृत्तिका नैव जलं, नाप्यग्निः कर्मशोधनम् ।
शोधयन्ति बुधाः कर्म, ज्ञानध्यानतपोजलैः ॥ २३४

एकेऽश्नन्ति सदा मांसं, प्रस्तावादपरेऽपि च ।
स्वं स्वं ब्राह्मण्यं प्रशंसन्ति, केषां वर्त्मानुगम्यताम् ॥ २३५

तथा च-

एकस्तु जलहारी स्याच्चेत्यावसरिकः परः ।
पुरोहितश्च व्यासश्च, पञ्चमो गणकः स्मृतः ॥ २३६

प्रथमश्च द्वितीयस्तु, कर्मकृद् द्वयमुच्यते ।
व्यासस्तु क्षणकारी स्यात्, शास्त्रे तुर्यस्य का गतिः ? ॥ २३७

उक्तं च-

ग्रामकुटस्त्रयो मासान्, माठापत्यं दिनत्रयम् ।
शीघ्रं नरकवाञ्छा चेद्, दिनमेकं पुरोहितः ॥ २३८

राज्ञि राष्ट्रकृतं पापं, राज्ञः पापं पुरोहिते ।
भर्तरि स्त्रीकृतं पापं, शिष्यपापं गुरौ भवेत् ॥ २३९

गणकस्तिथिवारादेर्मुहूर्त्तस्य च सूचकः ।
धर्मोपदेशकश्चैषु, कतमस्तन्निगद्यताम् ? ॥ २४०

पुराणं मानवो धर्म, इति वाक्यं हि कामधुक् ।
द्विजानामन्यथा हेतौ, क्रियमाणे किमुत्तरम् ॥ २४१

पुराणं मानवो धर्मः, साङ्गो वेदश्चिकित्सितम् ।
आज्ञासिद्धानि चत्वारि, न हन्तव्यानि हेतुभिः ॥ २४२

जन्मेजयनरेन्द्रेण, सन्देहत्रितयं कृतम् ।
पाप्मना तेन तद्देहे, मण्डलत्रितयं स्थितम् ॥ २४३

भयमेवं समुत्पाद्य, जन्मेजयनिदर्शनात् ।
स्वैरं विप्रा विलसत, हेत्वातङ्कविवर्जिताः ॥ २४४

विष्ठाशी सर्वदा पूतः, काकः केन गुणेन च ।
द्विजैः पवित्रं मन्वानै-र्भोज्यादौ पूज्यते सदा ॥ २४५

वैश्वदेवस्य देवानां, पितृणां पूजनक्षणे ।
काकस्य दीयते पङ्क्तिरपवित्रस्य किं द्विजैः ? ॥ २४६

कथयन्ति मुखे शौचं, संस्कारेष्वखिलेष्वपि ।
गृह्णन्ति कोरवस्त्राणि, मासाहसखगोपमाः ॥ २४७

नित्यं शुद्धः कारुहस्तः, पण्यं यच्च प्रसारितम् ।
ब्रह्मचारिगतं भैक्ष्यं, सर्वं मेध्यमिति स्मृतिः ॥ २४८

अशक्यपरिहार्येऽर्थे, द्विजानामेवमुत्तरम् ।
ब्राह्मण्या भाण्डमुत्क्षिप्तं, परिवेषणहेतवे ।
तत्स्पृष्टमपि न त्याज्यं, यावद्भूमौ न मुच्यते ॥ २४९

भूमिमुक्तं तदैव स्यात्, तद्भाण्डं त्याज्यमेव हि ।
एतावदपवित्रा भूर्ब्राह्मणी तु सदा शुचिः ॥ २५०

भोजनावसरे विप्राः, पृथगासनसंश्रिताः ।
भुञ्जानाः स्वं स्पृशन्तोपि, भूमेर्योगाच्च दूषिताः ॥ २५१

यद्येवम्–
गोमयेनोपलित्ता भूः, शुद्धा स्यादिति निश्चयः ।
एकवेलं विलिप्यैषा, मुच्यते किं पुनः पुनः ? ॥ २५२

अथ–
यथा प्रक्षालितं वस्त्रं, पवित्रं मन्यते द्विजैः ।
तद्वत् स्वयं कृतं भाण्ड–मपि नादीयते कथम् ? ॥ २५३

कुलालः शूद्र एव स्यात्, तेन पक्वं स्ववह्निना ।
विप्रैः पवित्रं मन्वानैर्भाण्डमादीयते कथम् ? ॥ २५४

ब्राह्मणानां हि भाण्डस्थं, पूतमन्नं तदप्यहो ।
अपूतं वणिजां दृष्टि-गोचरे स्यात् समागतम् ॥ २५५

तत्त्याज्यमेव विप्राणां, भोक्तुं नो युज्यते क्वचित् ।
अन्नस्य च व्यवस्थैषा, कूपस्याज्यस्य का कथा ? ॥ २५६

श्रूयते च-
नीली पट्टे जलं तक्रे, चित्रा गौर्म्लेच्छमन्दिरे ।
भिक्षान्नं पञ्चगव्यं च, पवित्राणि युगे युगे ॥ २५७

अपूतां गुलिकां प्राहुः, पुनः पट्टस्थितां नहि ।
युक्तं च शुद्ध्यते हत्या, हत्यया मिलिता सती ॥ २५८

क्षत्रियाणां च वैश्यानां, शूद्राणां भाण्डतो द्विजैः ।
तक्रमादीयते तस्मिन्, पक्वमन्नं न गृह्यते ॥ २५९

कोरमन्नं सदा पूतं, पानीयं ज्वलनोपि च ।
त्रयाणां योगतः सिद्धं, दूष्यं तत् कथमुच्यते ? ॥ २६०

घृतयोगाच्च भाण्डस्य, पूतत्वं जायते ध्रुवम् ।
तदा चाण्डालभाण्डस्थं, घृतमादीयते न किम् ॥ २६१

ब्रह्मणा विहितां सृष्टिं, प्राहुर्वेदविशारदाः ।
ते त्वसङ्ख्यास्ततस्तेषु, कतमः सृष्टिकारकः ? ॥ २६२

एकार्णवे समुत्पन्ने, यदैको नाभिसम्भवः ।
अपरे तु कथं जाताः ?, कथमेकश्च कथ्यते ॥ २६३

प्रादुरासन् कुतो वेदाः ?, कतमो हंसवाहनः ? ।
कतमः पञ्चवक्त्रोऽभूत्, कतमश्चतुराननः ? ॥ २६४

भारती तनया कस्य ?, गायत्री कस्य पत्न्यभूत् ? ।
अपूज्यः कतमो जातः ?, कतमाद्वर्णसम्भवः ? ॥ २६५

कतमाद्वालिखिल्यास्ते, भारतीं को ह्यकामयत् ? ।
दक्षः प्रजापतिः कस्मान् ?, मरीचिस्तु कुतोऽभवत् ॥ २६६

इयं हि लक्षणश्रेणिः, सर्वेषां च समा मता ।
एकस्य वा तदन्येषां, लक्षणं किञ्चिदुच्यताम् ॥ २६७

शिवशक्तेः समायोगात्, केपि सृष्टिं विदुः परे ।
कुब्जिकारूपमाधाय, शक्त्या सृष्टिं तथैकया ॥ २६८

उत्पत्तौ वालिखिल्यानां, का शक्तिः परिकल्पिता ? ।
तथा द्रोणसमुत्पत्तौ, द्वयोर्योगः कथं कृतः ? ॥ २६९

महाभारते शान्तिपर्वणि पितामहं धर्मपुत्रः पृच्छति–,
शतायुर्वै पुरुषः, शतवीर्यः शतेन्द्रियः ।
कस्मात् म्रियन्ते पुरुषाः बाला इति पितामह ! ॥ २७०

शतायुर्वै पुरुष, इति वेदवचो ध्रुवम् ।
दश वर्षसहस्राणि, आयुर्दशरथे कथम् ? ॥ २७१

उक्तं रघौ–
पृथिवीं शासतस्तस्य, पाकशासनतेजसः ।
किञ्चिदूनमनूनाद्र्धैः, शरदामयुतं ययौ ॥ २७२

श्रूयते–
अश्वस्थामा बलिर्व्यासो, हनुमाँश्च बिभीषणः ।
कृपः परशुरामश्च, सप्तैते चिरजीविनः ॥ २७३

हिरण्यकशिपोरायुर्वाल्मीकेर्लोमशस्य च ।
वशिष्ठाधिसून्वोश्च, श्रुत्वा चेतो विमुह्यति ॥ २७४

दैत्यत्वे च मुनित्वे च, नृपतित्वे तथैव च ।
वेदवाक्यमतिकम्य, कथमायुर्विवद्र्धते ? ॥ २७५

पुच्छाधः पूज्यते धेनोः, कथं शण्डो न पूज्यते ? ।
सर्वदेवमयं स्थानं, यश्चाक्रामति हेलया ॥ २७६

शण्डस्य पाणिग्रहणा-दहो पुण्यमुपार्जितम् ।
सा धेनुरेकपत्नी स्या-दनूढावर्जकश्च सः ॥ २७७

कुलक्षणः कुवर्णो यः, शण्डो भवति कश्चन ।
स नील इति जल्पद्भिः, स्वार्थिकैः श्रूयतेतराम् ॥ २७८

विवाहश्च तथा धेन्वा महोत्सवपुरस्सरम् ।
कार्यते यैर्न दोषोऽस्ति, तेषां लोभे मतिर्यतः ॥ २७९

ये तु क्लेशशतैरर्थ-मुपात्तं तद्वचोबलात् ।
क्षयं नयन्ति ज्ञंमन्यास्तेषां प्रावीण्यमद्भुतम् ॥ २८०

शुक्ला स्याद् ब्राह्मणी धेनू, रक्तवर्णा च क्षत्रिणी ।
पीता वैश्यी तु विज्ञेया, कृष्णवर्णा तु शूद्रिणी ॥ २८१

कुवर्णा पुष्पिता या च, कपिला कर्बुरा तथा ।
सर्वेपि शूद्रिकाभेदाः, शेषां स्युरिति विश्रुतम् ॥ २८२

श्वेतरोगधरो यद्वन्, नरो भवति गर्हितः ।
तद्वत् कुवर्णा धेनुः स्याज्जुगुप्स्या हि सतां पुनः ॥ २८३

कुवर्णा तु गृहस्थस्य, नार्हा स्थापयितुं गृहे ।
तामादातुं द्विजैर्नाना-प्रकारैः श्रूयतेतराम् ॥ २८४

वत्सलां गुणसम्पूर्णां, तरुणीं वत्ससंवृताम् ।
दत्त्वेदृशीं गां विप्राय, सर्वपापैः प्रमुच्यते ॥ २८५

बलान्विताः शीलवयोपपन्नाः, सर्वाः प्रशंसन्ति सुगन्धिवत्यः ।
यथाहि गङ्गा सरितां वरिष्ठा, तथा जनानां बहुला गरिष्ठा ॥२८६

तस्मात्प्रदाने बहुलाप्रदाने, सद्भिः प्रशस्तं कपिलाप्रदानम् ।
भारते शान्तिपर्वणि । तथा च रघौ वशिष्ठधेनुरेवं वर्ण्यते-
ललाटोदयमाभुग्नं, पल्लवस्निग्धपाटला ।
बिभ्रती श्वेतरोमाङ्कं, सन्ध्येव शशिनं नवम् ॥ २८७

सापि कपिला न-
ब्राह्मणैरेव जीवानां, कृता वर्णादिकल्पना ।
अस्माकं तु मते गावः, समानाः सकला अपि ॥ २८८

यावज्जीवं नरः कश्चित्, कृत्वा पुण्यपरम्पराम् ।
मृतः क्वापि विदेशेऽसौ, प्रेतकार्यं च नाभवत् ॥ २८९

अपरः पापकृद् धूर्त्तः, क्रोधनो लोभवाँस्तथा ।
स स्वगेहे मृतस्तस्य, प्रेतकार्यं सुतादिभिः ॥ २९०

विदधे धेनुदानाद्यं, सर्वमुद्यापनं द्विजैः ।
त्रिदिवं कस्तयोर्यातो, नरकं कश्च जग्मिवान् ? ॥ २९१

आद्यश्चेन्नरकं स्वर्गात्, पातितो ब्राह्मणैर्बलात् ।
द्वितीयस्तु पुनः श्वभ्राद्, बलात्स्वर्गं निवेशितः ॥ २९२

देवताऽऽराधनैर्दानैस्तपोभिस्तर्हि पूर्यताम् ।
ब्राह्मणा यत्र नेष्यन्ति, गन्तव्यं तत्र निश्चितम् ॥ २९३

न देवयज्ञानुगतो ययातिः, शर्मिष्टया नापि च गुप्तपत्न्या ।
न शान्तनुर्योजनगन्धया च, तस्यापि पुत्रौ न तयोर्वधूभिः ॥२९४

न रामतातस्तिसृभिः प्रियाभि-र्न सीतया सोऽपि च रामभद्रः ।
न रावणस्तत्प्रियययाऽनुयातो, दुर्योधनो नैव च भानुमत्या ॥२९५

नानुप्रयातश्च हरिः प्रियाभिस्तद्बान्धवस्तत्प्रिययापि नैव ।
क एष धर्मः प्रविशन्ति वह्निं,
नार्योऽधुना कान्तमुपासितुं स्वम् ॥ २९६

उक्तच्चरघौ अजं प्रति वशिष्ठशिष्येण-
रुदता कुत एव सा पुनर्भवता नानुमृतापि लभ्यते ।
परलोकजुषां स्वकर्मभिर्गतयो भिन्नपथा हि देहिनाम् ॥ २९७

यदा भगीरथो गङ्गां, स्वर्गाद्भूमौ समानयत् ।
तदा पूर्वं महेशस्य, जराजूटे पपात सा ॥ २९८

ततश्च वासुदेवस्य, पादे मूर्ध्नि ततो गिरेः ।
क्रमाच्च पृथिवीं लेभे, पुराणे श्रूयते ह्यदः ॥ २९९

स्थिरत्वाच्च गिरेः शृङ्गे, पतत्वेषा न कौतुकम् ।
वासुदेवेशयोः किं न, कार्यान्तरमजायत ? ॥ ३००

कथयन्ति वधूशुद्धिं, वैश्वदेवप्रवेशनात् ।
कुन्त्यास्तु सा कथं जाता ?, यत् पञ्चपतिका च सा ॥ ३०१

पाण्डोः सुतानां च कुरूत्तमाना-मनागतं यश्चरितं चकार ।
राज्यं जितं केन दुरोदरेण, सपादलक्षेपि तदेव नाख्यत् ॥३०२

न रात्रेर्भोजनात् पापं, न वृन्ताकैर्न मूलकैः ।
नालिकेरैर्न मधुना, किन्तु तुम्बीफले स्थितम् ॥ ३०३

काकविष्ठासमुद्भूतस्तथा कृमिकुलाकुलः ।
पिप्पलः पूज्यते मूढैः कथमाम्रो न पूज्यते ? ॥ ३०४

'आत्मा वै जायते पुत्र', इति सत्यं वचो यदि ।
पिप्पलस्थस्तथा शम्याः, कथं नैका फलावलिः ? ॥ ३०५

एकस्य चेत् पिप्पलस्य, कारितं पाणिपीडनम् ।
कुमाराणां तु तस्यापि, दर्शयतां किञ्चिदन्तरम् ॥ ३०६

पिप्पलस्याथ पिप्पल्याः, शम्या वा तन्नरस्य च ।
ज्ञात्वाऽन्तरं विवाहश्च, क्रियतां नो यतस्ततः ॥ ३०७

न रतिर्यस्य रुक्मिण्या, न श्रियाऽतिमनोज्ञया ।
गोपीभिरपि नो जाता, किन्तु लक्ष्म्या भविष्यति ॥ ३०८

भुङ्क्ते तां नररूपेण, सुरस्यागम्य वा पुनः ।
कीटरूपेण वा कुन्थोर्हरिः सम्यग्विमृश्यताम् ॥ ३०९

न दानान्नापि शीलाच्च, न सत्याच्चिरपालितात् ।
मुक्तिः स्यात् किन्तु वक्त्र (तुल)स्था,
दास्यत्येव हरिप्रिया ॥ ३१०

हरेरतिप्रियैवैषा, पूज्यते यैस्तु लक्ष्मिका ।
वृक्षास्ते नररूपेण, परं पत्रादिवर्जिताः ॥ ३११

विधेर्विधायिनो विप्रा, अपूर्वाः सृष्टिकारकाः ।
स्वयम्भूः सृष्टिकृत्तेषु, सृष्टिसंहारयोरपि ॥ ३१२

तीर्थानामष्टषष्ठिश्च, देवानां कोटयो घनाः ।
नवकोट्यस्तु देवीनां, कस्याराधनतः फलम् ॥ ३१३

इयं भगवती लक्ष्मीः, पुरुषोत्तमवल्लभा ।
जनेन त्रिविधेनापि, भुज्यते तन्न सुन्दरम् ॥ ३१४

अथ चैवं नराः सर्वे, हरेरंशाः प्रकीर्त्तिताः ।
स्वां प्रियां प्रति मा कोपं, कुरुध्वं परसङ्गमे ॥ ३१५

आमलक्या व्रतपरान्, हरिः प्रेक्ष्य हसत्यहो ! ।
बुभुक्षया फेरकैश्च, सन्ति भव्यं विगोपिताः ॥ ३१६

एकमेव हि कुर्कुट्या, मर्कट्याश्च, महाव्रतम् ।
तारयिष्यति किं शेषैः, शरीरक्लेशकारिभिः ? ॥ ३१७

पतिव्रताव्रतं लोप्तुं, दैत्यस्त्रीणां तु मायया ।
विष्णुना नारदेनाथ, विहितेयं व्रतावलिः ॥ ३१८

क्वापि गायन्ति नृत्यन्ति, कूद्र्दन्ति ग्रहिला इव ।
चुम्बपानं प्रकुर्वन्ति, कौलीनत्वविघाति यत् ॥ ३१९

एतदेव व्रतं स्त्रीणां, यद्भक्तिर्भर्त्तरि स्वके ।
तां परित्यज्य नीयन्ते, धूर्तैरन्येषु वर्त्मसु ॥ ३२०

उक्तं च स्मृतौ–

अव्रता विधवा या तु, यतिश्चैवाव्रतस्तथा ।
अन्धेतमसि मज्जन्ति, यावदिन्द्राश्चतुर्दश ॥ ३२१

त्रिविधेन प्रकारेण, भर्त्तुर्या विहिते रता ।
पतिव्रता तु सा ज्ञेया, न योनिपरिरक्षणात् ॥ ३२२

अत्रापि विधवानां तु, व्रतमुक्तं मनीषिभिः ।
सधवानां तु पूर्वस्मादन्यत् क्वापि न दृश्यते ॥ ३२३

बहूनि सन्ति तीर्थानि, सर्वेष्वङ्कः कथं न हि ? ।
शरीरं विद्यते स्थूलं, वह्निः सर्वत्र लभ्यते ॥ ३२४

हृदये यदि देवोऽस्ति, तदाऽङ्कैः किं प्रयोजनम् ? ।
तत्र चेन्नास्ति किं तैस्तु, शरीरक्लेशकारिभिः ? ॥ ३२५

शिवस्य मस्तके गङ्गा, श्रूयते जलवाहिनी ।
किं घटाद्‌बिन्दुपातेन, तस्य शैत्यं भविष्यति ? ॥ ३२६

अतिनिर्मथितादग्नि-श्चन्दनादपि जायते ।
तथा भूतस्य लिङ्गस्य, युक्तं तज्जलसेचनम् ॥ ३२७

स्कन्धे विहङ्गिकां कृत्वा, गाङ्गमानीयते जलम् ।
किं तेन नीरवानीशो, न गाङ्गैः शिरसि स्थितैः ॥ ३२८

सुप्तस्तु दृश्यते विष्णुर्नृत्यन्नपि हि दृश्यते ।
उर्ध्वः सदैव तिष्ठेतोपविष्टः किं न दृश्यते ? ॥ ३२९

सर्वेषामपि देवानां, कूर्चः समवलोक्यते ।
विष्णोर्न दृश्यते हेतुस्तत्र कोऽत्र प्रकाश्यताम् ? ॥ ३३०

ब्रह्मरुद्रादिदेवाना-मासने पट्टको भवेत् ।
सिंहासनं कथं नास्ति, सर्वैश्वर्यप्रकाशकम् ? ॥ ३३१

सर्वेषामपि चैकैकं, छत्रं मूर्धनि दृश्यते ।
जगत्त्रयाधिपत्यस्य, सूचकं तत्त्रयं न किम् ? ॥ ३३२

प्रासादे मण्डपश्चैकः, सर्वेषां बहवो न किम् ? ।
कथं च वणिजां चैत्ये, तेषामष्टोत्तरं शतम् ? ॥ ३३३

मानवानां हि वाक्येषु, प्रतिष्ठैवावलोक्यते ।
देवानां वचसि क्वापि, बालवत् सा न दृश्यते ॥ ३३४

अट्टहासो मनुष्याणां, सर्वथैव निषिध्यते ।
देवानां तु पुनर्मुख्यः, सर्वशास्त्रेषु वर्ण्यते ॥ ३३५

मानुष्येषु पुनर्नृत्यं, नटादीनां च शोभते ।
देवानां तेन चोत्कर्षः, प्रत्युत श्रूयतेतराम् ॥ ३३६

अस्थिलेशो मनुष्याणा-मपावित्र्यकृते भवेत् ।
रुण्डमुण्डादिभिस्तेषां, प्रत्युताभरणस्थितिः ॥ ३३७

दिर्वा स्त्रीभाषणं नृणां, लज्जायै तैः समादृतम् ।
युक्तमेतत्समाख्यातं, न देवचरितं चरेत् ॥ ३३८

शिखण्डिनः समुत्पत्त्या, श्रुतया कस्य मानसम् ।
मन्यते सत्यमेतच्च, मुक्त्वा तद्वादिनो नरान् ॥ ३३९

सूर्यान्वयमहीशानां, वशिष्ठः श्रूयते गुरुः ।
एकः सप्तऋषीणां च, मध्ये संदृश्यतेऽम्बरे ॥ ३४०

अर्बुदाद्रेः समानेता, चैकस्तत्रैव विद्यते ।
वशिष्ठश्चैक एवासीत्, सञ्जाता बहवोऽथवा ? ॥ ३४१

दीक्षितैः पाठकैश्चापि, आचार्यैर्याज्ञिकैस्तथा ।
वेदोक्तैः क्रियते मन्त्रैर्यागश्चैतच्च निश्चितम् ॥ ३४२

विश्वामित्रवशिष्ठाद्यैः, शिवभक्तैर्जटाधरैः ।
गृहस्थैर्ये विधीयन्ते, यागास्तैस्ते कथं कृताः ? ॥ ३४३

रघावुक्तम्-
स जातकर्मण्यखिले तपस्विना, तपोवनादेत्य पुरोधसा कृते ।
दिलीपसूनुर्मणिराकरोद्भवः,
प्रयुक्तसंस्कार इवाधिकं बभौ ॥ ३४४

उक्तमनर्घ्यराघवे-

प्रज्ञातब्रह्मतत्त्वोऽपि, स्वर्गीयैरेष खेलति ।
गृहस्थसमयाचार-प्रकान्तैः सप्ततन्तुभिः ॥ ३४५

दशमीमिश्रितामेके, केवलामपरे पुनः ।
घटिकासङ्ख्यया केचित्, केचित्पञ्चदर्शी तिथिम् ॥ ३४६

कुर्वन्त्येकादशीमेवं, नानामतविकल्पनात् ।
कथं दृष्ट्या विहीनस्य, मार्गमन्धः प्रकाशयेत् ? ॥ ३४७

द्विधा ये मुनयः प्रोक्ता, ब्रह्मराजर्षिसञ्ज्ञया ।
जटाधराः सभस्मानः, सर्वे वल्कलवाससः ॥ ३४८

तेषां मते शिवो देवोऽन्यस्य कुर्वन्ति नो नतिम् ।
द्विविधा अपि ते शैवाः, को मदस्तैर्द्विजन्मनाम् ? ॥ ३४९

उक्तं च शैवागमे-

सत्येन ब्रह्मचर्येण, तपसा संयमेन च ।
मातङ्गोपि मुनिः सिद्धो, न सिद्धास्तीर्थयात्रया ॥ ३५०

[षडक्षरेण पूतो यश्चाण्डालो वाऽथ ब्राह्मणः ।
दीक्षितः शिवमन्त्रेण, सभस्माङ्गः शिवो भवेत् ॥] ३५१

उक्तं च कुमारसम्भवे-

ते सद्मनि गिरेर्वेगादुन्मुखद्वाःस्थवीक्षिताः ।
अवतेरुर्जटाभारैर्लिखितानलनिश्चलैः ॥ ३५२

अत्र ऋषयो जटाधराः ।

तृतीयाश्रममापन्नान्, ब्रूथ चेद् ब्राह्मणान् ऋषीन् ।
वाल्मिकीव्यासमुख्यानां ब्राह्मण्यमभवत्कथम् ? ॥ ३५३

अथ–

भस्माङ्कुरास्तु ते सर्वे, ये जाता वनवासिभिः ।
तैः कृतानि पुराणानि, प्रमाणीक्रियतां कथम् ? ॥ ३५४

अन्त्याश्रमसमासीनो, द्विजस्तु भगवान् भवेत् ।
त्यक्तोपवीतकाषाय–वसनो मुण्डितः पुनः ॥ ३५५

भैक्षाशी विप्रगेहेषु, विष्णुमन्त्रेण पावितः ।
सर्वकर्मविनिर्मुक्तो, विष्णोरन्यस्य नो नतः ॥ ३५६

कुटीचरादिभेदैस्तु, चतुर्द्धा भुवि विश्रुतः ।
न करोति स्वयं हिंसां, हिंसाशास्त्राणि नो दिशेत् ॥ ३५७

उक्तं च–

कुटीचरं दहेदग्नौ, जले क्षिपेद् बहूदकम् ।
भूमौ विनिक्षिपेद्धंसं, परमहंसं वने त्यजेत् ॥ ३५८

एवंविधस्तु संन्यासी, विप्राणां गुरुरिष्यते ।
शैवैस्तु मुनिभिः साकं, कः सम्बन्धो द्विजन्मनाम् ॥ ३५९

तैरुक्तानि पुराणानि, स्मृतयोपि च तैः कृताः ।
शास्त्रैस्तैर्ब्रूत विप्राणां, मत्तता किमियत्यहो ! ॥ ३६०

शैवाः कथयन्ति–

शिवशक्तिसमुत्पन्ना, जात्या वदन्ति ब्राह्मणाः ।
ध्यायन्ति केशवं देवं, प्रत्यक्षं गुरुतल्पगाः ॥ ३६१

जिनाङ्गुलप्रमाणेन, क्रियते घृतलेखनी ।
जिना न सन्ति किं तेषां, सङ्ख्या वेदे प्रकाशिता ? ॥ ३६२

उक्तंच– 'जिनाङ्गुलप्रमाणा दर्वी' तथा–
नानास्थानानि दत्तानि, मनुजैश्च सुरैरपि ।
जिनचैत्यनिवेशः किं, तेषु सर्वत्र दृश्यते ? ॥ ३६३

नगरे त्रीणि चैत्यानि, द्वितयं वायडे तथा ।
नड्डूले द्वितयं चैव, पल्यां त्रितयमेव च ॥ ३६४

एकं वटमहास्थाने, पञ्चजालन्धरे पुनः ।
पञ्चकं पुष्करिण्यां तु, शुद्धदन्त्यां तथैककम् ॥ ३६५

डीसके समभूदेकं, एकं मोढेरके पुनः ।
दशकं खेटयुग्मे च श्रीमाले पञ्चकं पुनः ॥ ३६६

मठास्तथैव जैनानां, मुनीनां वासहेतवे ।
गच्छास्तेषां च तन्नाम्नाऽद्यापि सर्वत्र विश्रुताः ॥ ३६७

शालातालानिवेशेन, तेषां तत्र व्यवस्थितिः ।
कथ्यते किं द्विजैर्जैनाः, पाश्चात्याः साधवस्त्वमी ? ॥ ३६८

उक्तं च –
जिनेन्द्रो वीतरागोऽर्हन्, केवली च त्रिकालवित् ।
एतानि कस्य नामानि, कथ्यन्ते बालकैरपि ॥ ३६९

नाममालायां । प्रभासपुराणे–
भवस्य पश्चिमे भागे, वामनेन तपः कृतम् ।
तेनैव तपसाऽऽकृष्टः, शिवः प्रत्यक्षतां गतः ॥ ३७०

पद्मासनसमासीनः, श्याममूर्त्तिर्दिगम्बरः ।
नेमिनाथः शिवेत्येवं, नाम चक्रेऽस्य वामनः ॥ ३७१

कलिकाले महाघोरे, सर्वपापप्रणाशकः ।
दर्शनात्स्पर्शनाद् देवि !, कोटियज्ञफलप्रदः ॥ ३७२

अहिल्यागमने जातं, दैत्यानां च वधे कृतम् ।
वधे वृत्तस्य यत्पापं, तत्पापं क्षालयाम्यहम् ॥ ३७३

उज्जयन्तगिरौ रम्ये, माघे कृष्णचतुर्दशी ।
तस्यां जागरणं कृत्वा, जातोऽयं निर्मलो हरिः ॥ ३७४

इदमपि प्रभासपुराणे-

युगे युगे महापुण्या, दृश्यते द्वारिकापुरी ।
अवतीर्णो हरिर्यत्र, प्रभासे शक्तिभूषणः ॥ ३७५

रैवताद्रौ जिनो नेमि-र्युगादिर्विमलाचले ।
ऋषीणामाश्रमा देवि !, मुक्तिमार्गस्य कारणम् ॥ ३७६

वशिष्ठपद्धतावुक्तम्-

शाला तु ब्रह्मशाला स्यात्, ताला तु जिनमन्दिरम् ।
श्वेताम्बरोपदेशेन, श्रावकैस्तद्विधीयते ॥ ३७७

पार्वती आह-

कीदृशाश्च किमाहाराः, कर्म कुर्वन्ति कीदृशम् ? ।
अवतारः कथं तेषां, महादेव ! निगद्यताम् ? ॥ ३७८

ईश्वर उवाच-

तपःशोषितसर्वाङ्गा, मलक्लिन्नकलेवराः ।
स्नसास्थिचर्मवपुषो, निहतान्तरशत्रवः ॥ ३७९

तुम्बीफलकरा भिक्षा-भोजिनः श्वेतवाससः ।
सकम्बला रोमयुता, ऊर्णारोमप्रमार्जनाः ॥ ३८०

गृह्णन्ति शुद्धमाहारं, शास्त्रदृष्ट्या चरन्ति च ।
न कुर्वन्ति कदा पापं, दयां कुर्वन्ति सर्वदा ॥ ३८१

मुक्तिकारणधर्माय, पापनिष्कन्दनाय च ।
अवतारः कृतोऽमीषां, मया देवि ! युगे युगे ॥ ३८२

यदमीषां महर्षीणां, जलदानादपि प्रिये ! ।
सुकृतं प्राप्यते लोकै-र्न हि तद् यज्ञकोटिभिः ॥ ३८३

नगरपुराणेऽप्युक्तम्-
दशभिर्भोजितैर्विप्रै-र्यत्फलं जायते कृते ।
मुनेरर्हद्भक्तस्य, तत्फलं जायते कलौ ॥ ३८४

विष्णुपुराणे-
रजस्वला न दूष्येत, या च नारी तपस्विनी ।
कुमारी वेदिमारूढा, ब्राह्मणी चाथ दीक्षिता ॥ ३८५

मनुस्मृतौ-
कुलादिबीजं सर्वेषां, प्रथमो विमलवाहनः ।
चक्षुष्मान् यशस्वी चाभिचन्द्रश्च प्रसेनजित् ॥ ३८६

मरुदेवश्च नाभिश्च, भरते कुलसत्तमाः ।
अष्टमो मरुदेव्यां तु, नाभेर्जात उरुक्रमः ॥ ३८७

दर्शयन् वर्त्म वीराणां, सुरासुरनमस्कृतः ।
नीतित्रयस्य कर्त्ता यो, युगादौ प्रथमो जिनः ॥ ३८८

इदं नगरपुराणे भवावताररहस्ये दशमसहस्त्रे चतुर्दशशते उक्तम्-
स्पृष्ट्वा शत्रुञ्जयं तीर्थं, नत्वा रैवतकाचलम् ।
स्नात्वा गजपदे कुण्डे, पुनर्जन्म न विद्यते ॥ ३८९

अकारादि हकारान्तं, उर्ध्वाधोरेफसंयुतम् ।
नादबिन्दुकलाक्रान्तं, चन्द्रमण्डलसन्निभम् ॥ ३९०

एतद्देवि ! परं तत्त्वं, यो विजानाति तत्त्वतः ।
संसारबन्धनं छित्त्वा, स गच्छेत् परमां गतिम् ॥ ३९१

शिवेन गौर्या अग्रे उक्तं । श्रीभागवते पुष्पदन्तगणेन महिम्नः स्तवे द्वात्रिंशत्काव्यमित्ते दर्शननतिरिति, यथा–

ध्रुवं कश्चित्सर्वं सकलमपरस्त्वध्रुवमिदं,
परो ध्रौव्याध्रौव्ये जगति गदति व्यस्तविषये ।
समस्तेऽप्येतस्मिन् पुरमथन ! तैर्विस्मित इव,
स्तुवन् पश्यन् जिङ्घ्रन् (जिह्रेमि त्वां)
न खलु ननु दृष्टा मुखरता ॥ ३९४

पञ्चाशदादौ किल मूलभूमे-र्दशोर्ध्वभूमेरपि विस्तरोऽस्य ।
उच्चत्वमष्टैव च योजनानि, मानं वदन्तीह जिनेश्वराद्रेः ॥३९५

इदं नगरपुराणे–
नाभेः सुतः स वृषभो मरुदेविसूनु-
र्यो वै चचार शमदृक् मुनियोगचर्याम् ।
तस्यापहूत्यमृषयः पदमानमन्ति,
स्वस्थाः समाहितधियो जगतां हिताश्च ॥ ३९६

भागवते–
तथा च ब्रह्मणः पुत्रः, सूत्रधारोऽपराजितः ।
तेनास्ति विहितं शास्त्र-मपराजितसञ्ज्ञितम् ॥ ३९७

प्रासादस्थापनं तत्र, गृहस्थापनमेव च ।
मूर्त्तीनां घटनं चैव, सर्वमस्ति यथाविधि ॥ ३९८

सुमेरुशिखरं दृष्ट्वा इत्यादि ।
द्वात्रिंशत्सम्मितैः श्लोकैरुमापृच्छत् महेशतुः ।
तत्रेशेन स्वयं प्रोक्ता, देव्यै ह्याराधना जिने ॥ ३९९

कथमिव जैनमुनीनां, दर्शनमपशकुनहेतवे मूढाः ।
मन्यन्ते सर्वेष्वपि, भव्यं शास्त्रेषु प्रोक्तमपि ॥ ४००

तथा च भारते-कृष्णवाक्यमर्जुनं प्रति-
आरोहस्व रथं पार्थ !, गाण्डीवं च करे कुरु ।
निर्जितां जगतीं मन्ये, निर्ग्रन्थो यदि सन्मुखः ॥ ४०१

तत्रैव-
पद्मिनी राजहंसाश्च, निर्ग्रन्थाश्च तपोधनाः ।
ये देशमुपसर्पन्ति, तत्र देशे शिवं भवेत् ॥ ४०२

तथा च शकुनसारे-
दर्शनं श्वेतभिक्षूणां, सर्वोत्तमफलप्रदम् ।
किं पुनः सूरिसंयुक्तं, राजयोगोऽयमुत्तमः ॥ ४०३

उक्तं च वसन्तराजे-
वमन् विकेशा हतमानगर्वाच्छिन्नाङ्गनग्नां त्यज तैलदिग्धाः ।
रजस्वला गर्भवती रुगार्त्ता, मलान्वितोन्मत्तजटाधराश्च ॥ ४०४

दीनद्विषत् कृष्णविमुक्तकेशाः, क्रमेलकस्थाः खरसैरिभस्थाः ।
संन्यासिसाक्रन्दनपुंसकाद्याः, दुःखावहाः सर्वसमीहितेषु ॥ ४०५

क्षुत्क्षामकुक्षिः स्नातो वा, तिलकैश्चित्रितोऽथवा ।
मुक्तकेशो भवेद् दुष्टो, ब्राह्मणोपि निरीक्षितः ॥ ४०६

विकेशानिति चेद् ब्रूथ, स्नातकास्तद्धुरिस्थिताः ।
तथा कार्पटिकाः सर्वे, पुनस्तीर्थेषु मुण्डिताः ॥ ४०७

साङ्ख्यदर्शनिनः सर्वे, बौद्धाः सर्वे तथैव च ।
योगिनोऽपि विकेशाः स्यु-र्व्रतिभिः किं विनाशितम् ? ॥४०८

ब्राह्मणोपि हि निर्वाप-करो वाऽकृतभोजनः ।
वेदं गणन् शुभस्त्वेषां, विपरीतोऽशुभो मतः ॥ ४०९

पाणिग्रहणे कन्यायाः, सुमहत् श्रूयते फलम् ।
तस्यास्तु वित्तग्रहणात् पातकस्य परम्परा ॥ ४१०

भारतवाक्ये-

ग्रामे वसति षण्मासान्, स्वसुतां चोपजीवति ।
एकाकी मिष्टमश्नाति, तस्यार्थोऽनुमतो गतः ॥ ४११

सदा कृतं मूलकभक्षणं तैर्वित्तेन दत्ता स्वसुता नरैस्तैः ।
छेदः कुतो वैष्णवपादपानां, नन्दा कृता यैर्दशमी विमिश्रा ॥४१२

एकादशीमाहात्म्ये-

कथयन्ति मुखे ग्राह्यं, केचिद् गृह्णन्ति तत्सदा ।
निर्वाहे सत्यपि क्वापि, तद् ग्राह्यं तैः कथं श्रुतम् ? ॥ ४१३

एकत्र ब्रह्मचर्यस्य, पालनं स्खलनं तथा ।
अपरत्रोभयोर्मध्यात्, किमङ्गीक्रियतां जनैः ? ॥ ४१४

व्यासोक्तौ-

एकरात्रोषितस्यापि, या गतिर्ब्रह्मचारिणः ।
न सा क्रतुसहस्रेण, वक्तुं शक्या युधिष्ठिर ! ॥ ४१५

भागवते च–

कामादुपागतां गच्छे–दगम्यामपि योषितम् ।
जितेन्द्रियोऽपि तां त्यक्त्वा, युज्यते स्त्रीवधेन सः ॥ ४१६

कामार्त्तां स्वयमायातां, न भुङ्क्ते यो नितम्बिनीम् ।
सोऽवश्यं नरकं याति, तन्निःश्वासहतो नरः ॥ ४१७

सदैव येन कार्यं स्यात्, स चाशुद्धोपि शुद्धिमान् ।
त्यज्यतेऽग्निर्न दुष्टोपि, नारी त्वन्यरतापि च ॥ ४१८

यत् उक्तम्–

द्वावेतावशुचीभूतौ, दम्पती सुरतस्थितौ ।
शयनादुत्थिता नारी, पुमान् स्नानेन शुद्धयति ॥ ४१९

तथा च यजुर्वेदे शतपथे रहस्यग्रन्थे उक्तं–
"इदं भो सुभगे ! भगं ते मधुसर्पिषा लिप्यते लिहामि प्रजापतेर्मुख–मेतद्द्वितीयम्" ॥

यतः स्मृतौ–

न स्त्री दुष्यति जारेण, नाग्निर्दहनकर्मणा ।
नापो मूत्रपुरीषाभ्यां, न विप्रो वेदकर्मणा ॥ ४२०

स्वयं विप्रतिपन्ना वा, यदिवा विप्रवादिनी ।
न त्याज्या दूषिता नारी, नास्यास्त्यागो विधीयते ॥ ४२१

स्त्रियो हि द्रव्यमतुलं, नैता दुष्यन्ति कर्हिचित् ।

तथा च-

अष्टवर्षा भवेद् गौरी, नववर्षा तु रोहिणी ।
दशवर्षा भवेत्कन्या, तत ऊर्ध्वं रजस्वला ॥ ४२२

सोमस्त्वासां ददौ शौचं, गन्धर्वो ललितां गिरम् ।
पावकः सर्वमेध्यत्वं, तस्मान्निःकिल्विषाः स्त्रियः ॥ ४२३

मासि मासि रजो यासां, दुष्कृतान्यपकर्षति ।
एवं वर्ण्यते, पुनर्गीतायाम्-

उत्तानोच्छूनमण्डूकपाटितोदरसन्निभे ।
क्लेदिनि स्त्रीव्रणे सक्तिरकृमेः कस्य जायते ?॥ ४२४

वर्ण्यते कार्यतो नारी, पुनरन्यत्र दूष्यते ।
अमृतं केनचिद् दृष्टं, विषमन्येन केनचित् ॥ ४२५

माघमासे प्रयागे यो, गत्वा स्नाति दिनत्रयम् ।
तिलाहारेण तिष्ठेच्च, स्वर्गस्तस्य करे स्थितः ॥ ४२६

कदाचिद् दैवयोगेन, माघस्नानं न जायते ।
तदा तिलैर्मुखे क्षिप्तैः, स्नानतोऽप्यधिकं फलम् ॥ ४२७

कदाचिन्नृपतिः पापघटं विप्रेषु यच्छति ।
पवित्रेषु तदा पापं, तिलेषु कथमागतम् ? ॥ ४२८

तिलानां विक्रये पापं, तैलिकस्य च दर्शनात् ।
पूतास्ते त्वपवित्रा वा, विमर्शन्मुह्यते मनः ॥ ४२९

न गयायां न गङ्गायां, स्नानदानैस्तु शुद्ध्यति ।
हृदये चेदशुद्धं स्यात्, तदा सर्वं निरर्थकम् ॥ ४३०

न स्नानैर्माघमासस्य, न गयापिण्डपातनैः ।
न तीर्थभ्रमणैः शुद्धि-र्नीरागस्य गृहेपि या ॥ ४३१

यत उक्तं हरिभद्रसूरिपादैः

यच्चिन्त्यमानं न ददाति युक्तिं, प्रत्यक्षतो नाप्यनुमानतश्च ।
तद्बुद्धिमान् कोऽनु भजेत लोके,
गोशृङ्गतः क्षीरसमुद्भवो न ॥ ४३२

हठो हठे यद्वदभिप्लुतः स्यान्नौर्नाविबद्धा च यथा समुद्रे ।
तथा परप्रत्ययमात्रदक्षो, लोकः प्रमादाम्भसि बम्भ्रमीति ॥४३३

यत-

गतानुगतिको लोको, न लोकः पारमार्थिकः ।
पश्य ब्राह्मणमूर्खेण, हारितं ताम्रभाजनम् ॥ ४३४

तथा च-

मातृमोदकवद् बाला, ये गृह्णन्त्यविचारितम् ।
ते पश्चात्परितप्यन्ते, सुवर्णग्राहको यथा ॥ ४३५

नेत्रैर्निरीक्ष्य विषकण्टककीटसर्पान्,
सम्यग् यथा व्रजति तान् परिहृत्य सर्वान् ।
कुज्ञानकुश्रुतिकुमार्गकुदृष्टिदोषान्,
ज्ञात्वा विचारयत कोऽत्र परापवादः ? ॥ ४३६

यत उक्तं श्रीउमास्वातिवाचकैः

आग्रही बत निनीषति युक्तिं, यत्र तत्र मतिरस्य निविष्टा ।
पक्षपातरहितस्य तु युक्ति-र्यत्र तत्र मतिरेति निवेशम् ॥ ४३७

युक्तायुक्तमिदं वाक्य-मवलोक्येह धीधनैः ।
मुक्त्वा कदाग्रहं तत्त्वे, जिनोक्ते क्रियतां मनः ॥ ४३८

यो रागरोषप्रमुखानरातीन्, जित्वा स्वयं मुक्तिपथं प्रपन्नः ।
स एव संसारसमुद्रमग्ना-नुद्धर्त्तुमीष्टे न परः कदाचित् ॥४३९

श्रीवृद्धगच्छाम्बरपूर्णचन्द्रः, श्रीदेवसूरिः सुगुरुर्बभूव ।
काष्ठाम्बरं यः कुमुदं विजित्य,
श्रीसिद्धराजं स्ववशं वितेने ॥ ४४०

तस्यान्वये यश्च बभूव साक्षात्, सरस्वतीति प्रथितः पृथिव्याम्।
सूरीश्वरः श्रीजयमङ्गलाख्यस्तच्छिष्यवर्योऽमरचन्द्रसूरिः ॥४४१

श्रीधर्मघोषसूरिस्तत्पट्टे सुरगुरो समप्रतिभः ।
यः कुम्भयोनिमुनिरिव, शास्त्रार्णवमापपावचिरात् ॥ ४४२

श्रीधर्मतिलकसूरेर्गुरुबन्धुर्ज्ञानकलशनामाऽस्ति ।
विहितस्तेन परेषां, सन्देहसमुच्चयो ग्रन्थः ॥ ४४३

श्रीसूरिभिः प्रसादं विधाय संशोधनीय एषतराम् ।
यस्माज्जैनमुनीना-मुपयोगस्त्वत्र बहुलोऽस्ति ॥ ४४४

मेरुर्महीधरो यावद्यावच्चन्द्रदिवाकरौ ।
तावद्विजयतामेष, वाच्यमानो विचक्षणैः ॥ ४४५

पू.आ.श्री वर्धमानसूरिविरचितः

# ॥ गणरत्नमहोदधिः ॥

## ॥ प्रथमोऽध्यायः ॥

वाग्देवतायाः क्रमरेणवस्ते, जयन्ति येषां मिषमात्रतोऽपि ।
सर्वार्थदर्शी मुकुरेण तुल्यः, प्रकर्षमेति प्रतिभाविलासः ॥ ॥१

शालातुरीयशकटाङ्गजचन्द्रगोमि-
दिग्वस्त्रभर्तृहरिवामनभोजमुख्याः ।
मेधाविनः प्रवरदीपककर्तृयुक्ताः
प्राज्ञैर्निषेवितपदद्वितया जयन्ति ॥ २

विदित्वा शब्दशास्त्राणि प्रयोगानुपलक्ष्य च ।
स्वशिष्यप्रार्थिताः कुर्मो गणरत्नमहोदधिम् ॥ ३

च वा हाहैवैवं नह नहि नवा नो चन हि है,
स्वधा स्वाहा रै वै यदि यदुत नूनं नहि कमः ।
उताहो हा ही हे किमुत यदि नामेव तु तथा
भगो भो हंहो हो इतिह नु सहामा ननु नञः ॥ ४

किंस्वित् प्रत्युत यच्च कच्चन न कं सत्रा समं साकमः,
सार्द्धं जातु कृतं यदा वदि वदूमाहो नवै यावतः ।
आहोस्वित् किल किंकिलालमररे दिष्ट्यो चिरस्य प्रगे,
ते मे येन चिराय तेन नहवै शश्वच्छुभं कूपतः ॥ ५

वाव त्वाव तुवै नुवै खलु चिराद् हेतावृतं तावतो,
मात्रायां मम हुं चिरेण पशवः प्राह्णे शुकं माकिरः ।
अन्योन्यस्य यथाकथाच वषटो मर्या स्म माङ्माथकिं,
चेदह्नाय हयेऽय्यये नकिररे रात्रौ पुरा सीमदः ॥ ६

श्रौषड् वौषड् प्याडहो नोहि वादः-
सूपत् कच्चिद् यत्र नेदङ्ग हन्ताः ।
त्वै न्वै छम्बट् पाडवेरे बताथो-
कुं हं हिं कद् वेदधाघो नुकं चाः ॥ ७

ओमादकस्मादुत यत्तदन्यत्,
पर्याप्तमग्रे कुविदाम नामाः ।
अन्यत्र घाथेद् विषु चित् सुकं किं,
स्विदन्तरेणैकपदेऽहहोत्रः ॥ ८

सत् फट् क्विच्चिररात्राय विभाषेति नचेत् पुतः ।
आः शप्समुपजोषं खोरठावाडां स्वरादयः ॥ ९

उत्तरपूर्वान्यतरा अपरान्यौ चेतराधरावुभयः ।
एद्युस्येते ज्ञेया उभयद्युश्चापि विद्वद्भिः ॥ १०

इत्थं तदानीं कथमः पुरस्तात्सद्योऽधुनाद्येह परेद्यविक्वाः ।
पश्चादिदानीं परुतः परार्यै कध्यं सदा द्युः पुरसः सदं च ॥११

सुच् कृत्वस् त्रा तस् त्र दा काम् र्हि धैधाः
स्तादाह्येनात् साच्च्विडाः स्युर्धमुत्र् थाः ।
शस् वत् तुम् णम् क्त्वादयश्च प्रसाक्षा-
दाद्युर्य्यादिश्चाव्ययीभावयुक्तः ॥ १२

आस ब्रूहि नयाति पश्यतयुतौ यात्यादहौ वर्त्तते-
स्यादातङ्क्न वर्त्तते भवतयो मन्येऽस्तु नास्त्यस्मयः ।
आदङ्कैह्यसि पूर्यतेऽस्ति भवतू शङ्के तथा विद्यते
पश्याहाविह कीर्त्तितौ मतिमता सङ्ख्ये निपाताह्वये ॥ १३

स्वः सायं समया दिवा पुनररं कामं प्रकामं बहिर्-
दोषा ह्यो निकषान्तरासनुतरो नक्तं नमो भूयसः ।
अन्तः प्रातरसांप्रतं परमृते साक्षात् सनत् साचयः-
सत्यं मङ्क्षु विहायसाशु सहसा प्रायः स्वयं संवतः ॥ १४

उच्चैर्नीचैरवश्यं सपदि बलवतः प्रादुराविः पुरस्तात् -
तूष्णीं जोषं निकामं युगपदनिशमः साम्यभीक्ष्णं सनोषाः ।
रोदस्यों भूर्भुवस् कं झटिति पुरतसोऽतीव सुष्ठु प्रसह्य,
द्राक् स्त्राग् मिथ्या वृथा शं कु
मिथुनमृध कोऽद्धाऽञ्जसाऽवो मनाकः ॥ १५

मिथुर्मिथो विष्वगुपांशु ताजग्-
मनश्चनः प्रेत्य मिथः शनैसः ।
मुधाऽन्वगीषच्चिरमो मृषास्तं-
धिगानुषक् स्वस्ति पुरोऽम्न इद्धाः ॥ १६

स्थाने वरं दुष्ठु हिरुग् बलातःप्रबाहुकं ज्योक्तिरसो मुहुः शू ।
युक्तं प्रशानार्य्यहलं क्षमाऽर्वाग्विनाश्च नाना पृथकौ सुदिश्च ॥१७

कस्कायस्कुण्डसाद्यस्काः सहकौतस्कुता मताः ।
सद्यस्कालशुनस्कर्णावयस्कान्तश्च भास्करः ॥ १८

मेदस्पिण्डतमस्काण्डायस्काण्डाहस्करास्तथा ।
रजःकर्णीरजस्कर्ण्यौ भ्रातुष्पुत्रदिवस्पती ॥ १९

अह्नः पतौ गणे पुत्रे, पतिपुत्रे च गीर्धुरः ।
राज्ञि प्रचेतसो रः स्याद्, विसृष्टस्योषसो बुधे ॥ २०

सर्वान्यविश्वोभयनेमयत्तदः किंयुष्मदस्मद्द्विभवत्त्यदेतदः ।
उभत्वदन्योऽन्यपरस्परेतराः समः सिमत्वान्यतरेतरेतराः ॥२१

एकेदमदसो ज्ञेया डतरो डतमस्तथा ।
स्वमज्ञातिधनेऽनाम्नि कालदिग्देशवृत्तयः ॥ २२

परा पूर्वा वरपरा उत्तरो दक्षिणाधरौ ।
अन्तरं चोपसंव्याने बहिर्योगे तथाऽपुरि ॥ २३

त्यत्तद्यदिदं युष्मद् द्व्येकादः स्यादथो भवत्वेतत् ।
अस्मत्किमौ च विबुधैर्विज्ञातव्यौ त्यदादिगणे ॥ २४

यस्कोत्कासवशिष्ठकुत्सखरपाः कुड्र्यत्रि जङ्घारथाः,
पर्णाटोपरिमेखलौ विषपुटद्रुह्याङ्गिरोविश्रयः ।
पिण्डीजङ्घभलन्दनौ च भडिलः कर्णाटकर्णाढकौ,
लह्यो भण्डिलशीर्षमायभृगवो रक्षोमुखो वर्षुकः ॥ २५

वशीकपर्णाढकमिच्छका बहि-
र्योगोऽजबस्तिस्तृणकर्णवर्ष्मकौ ।
पटाकयुक्तौ बकसक्थगोतमौ-
स्यात् क्रोष्टुमायः कटुमन्थमित्रयू ॥ २६

क्रोष्टुपादसदामत्ताऽयःस्थूणकृशभण्डिताः ।
पदकः कषको हारः कम्बलात् स्थगलस्तथा ॥ २७

उपकलमकौ पिष्टोदङ्कौ कुषीतककर्णकौ,
कमककलशीकण्ठौ कृष्णाजिनानुपदौ तथा ।
बधिरकखरीजङ्घावेतौ वटारकपर्णकौ-
गडुकजतुकौ लेखाभ्रूश्च प्रतानपतञ्जलौ ॥ २८

शलाथलाडारककृष्णपिङ्गलाः, कठेरणिः पिङ्गलकः कमन्दकः ।
निदाघचूडारककृष्णसुन्दराः, सुपिष्टपिञ्जूलकवर्णकास्तथा ॥२९

मसुरकर्णपदञ्जलजन्तुकाऽनभिहितप्रतिलोमकपिष्ठलाः ।
जतुरकः कशकृत्स्नसुधायुकौ जटिलकश्च मदाघकवन्तकौ ॥३०

कमन्तकः कदामत्तः, खरीखभ्रष्टकौ तथा ।
अपजग्धानुलोमौ च, दामकण्ठोऽप्यबन्धकः ॥ ३१

तिककितवौरसलङ्कटकृष्णाजिनकृष्णसुन्दराः कथिताः ।
उपकलमकाश्च वङ्खरभण्डीरथपफकनरकाश्च ॥ ३२

बकनखगुदपरिणद्धाः, शण्डिलकशकृत्स्नलङ्कशान्तमुखाः ।
प्रहितनरकोब्जककुभाः, प्रोक्ता भ्रष्टककपिष्ठलाश्चात्र ॥ ३३

दशेरकाग्निवेशेभ्यो, गडेरकदशेरकाः ।
कृष्णेभ्यः सुन्दराः प्रोक्ताः, ककुभश्च पृथोर्जकात् ॥ ३४

ज्ञेयो गोपवनो बिन्दुः शिग्रुश्यामाक भाजनाः ।
श्यामकाश्यावतानौ च, श्यापर्णः सम्बकस्तथा ॥ ३५

क्रौडिव्याड्यापक्षितिसौधातकि दैवदत्तिचैकयताः ।
कापिष्ठलि चैटयतावापिशलिर्लाडिचौपयतौ ॥ ३६

बैल्वयतोऽथ क्षत्रियवाच्यो, भोजश्च सूतवाग्युवतौ ।
भौरिकिभौलिकिशालास्थलिशाल्मलिकौटिसैकयताः ॥ ३७

अजपरभृताश्वकोकिलचटकैडकमूषिकाविलातश्च ।
बालः पाको मन्दः कन्यो वत्साम्बहोडाश्च ॥ ३८

मध्यज्येष्ठौ मध्यमकनिष्ठपूर्वापहाणदंष्ट्राः स्युः ।
अपरापहाणमुग्धौ पालान्ताः सम्प्रहाणश्च ॥ ३९

दिशा दृशा क्षुधा वाचा, क्रुञ्चा देवविशोष्णिहा ।
विकल्पाडो बुधैर्लक्ष्या, जातिः शूर्दोऽमहत्परः ॥ ४०

संभस्त्रापिण्डाजिनशणत्रिपूर्वं फलं नञो मूलम् ।
प्राक्शतसदेककाण्डप्रान्तात्पुष्पं परं ज्ञेयम् ॥ ४१

स्वसा माता ननान्दाऽथ, दुहिता तिसृयुष्मदौ ।
स्तश्चतस्त्रस्मदौ याता, नान्ता संख्यापि कीर्त्तिता ॥ ४२

क्रोडबालागलाभालभगोखाः खुरसंयुताः ।
शफो भुजो गुदो घोणा–करौ क्रोडादिनामनि ॥ ४३

गौरारीहणखारकर्करचराः सारङ्गशृङ्गाढका,
द्रोणालिन्दवराहबिम्बबदरा लोहाण्डपाण्टौ पुटः ।
नाटः पिण्डसृपाटचेटबरटा मूलाटसूपारटाः,
शूर्पासन्दनदाः पितामहमहौ मातामहो मालतः ॥ ४४

कदरकदलसूचा मण्डलो मण्डकश्च,
प्लवभषकृषभङ्गा यूषतर्कारमत्स्याः ।
गवयमुकयगाहा मेधशर्कारपुत्राः,
शबलगडुलगूर्दाः सूदकल्माषदेवाः ॥ ४५

उभयहयमनुष्याः कुम्भदासौ पिशङ्गः,
कुवलहरिणयूथाः शूषमेथौ गुडूचः ।
अमरपिठरसूर्माः पिप्पलो वैजयन्तो,
विकलमठकरीरी केतकास्थानचोराः ॥ ४६

द्रुणविटसरसा यः स्थूण सौधर्ममाचाः,
पटललवलपादा वल्लकालम्बिनाचाः ।

अतसपृथिवभृङ्गाः कन्दलारट्टिदोटाः,
शमतमकुटपेटा मञ्जरो निष्कलश्च ॥ ४७

ऋश्यो बन्धकधातकावनडुही शष्कण्डकोशातका-
ऽनड्वाहीबृसवेतसाः पटनटक्रोष्ट्र्योकणाः काकणः ।
आलक्ष्यालजभिक्षुकोर्दसुषवा औद्गाहमानिर्गरो
गायत्र्यामलकौ हरीतकशचावालब्धिमांसौ तरः ॥ ४८

कुसुम्भसुन्दरौ पूयः, शष्कुलो देहलस्तटः ।
तापसोऽथ सिनीवालः, पूलसल्लकगौतमाः ॥ ४९

कटेटभौलिङ्ग्यधिकारदेहा,
गवादनोद्वाहनतेजनाः स्युः ।
आपच्चिको भौलिकिभौरिकी च,
काकादनः प्रत्यवरोहिणी च ॥ ५०

बर्बरदाडिमचमसास्तरुणस्तलुनाग्रहायणीबन्दाः ।
पण्डरपुष्कललवणाः पिङ्गलमुसलौ विभीतको नन्दः ॥ ५१

शोणोऽथ भरुजस्तूण-कमलौ विकटाहनी ।
चान्द्रभागा भवेन्नद्यां, क्त्यर्थशून्यादिकारतः ॥ ५२

चण्डः पद्धतिकल्याण-पुराणकृपणध्वजाः ।
विशालारालमूषा हनु, बहूदारविशङ्कटाः ॥ ५३

कुण्डः पात्रेऽकृत्रिमार्थे स्थलं च,
भाजः पक्वे कामुकः स्याद्रिरंसौ ।
नागः स्थूले कृष्णवर्णे च कालो,
धान्याधारे सम्मतो गोणशब्दः ॥ ५४

कुशो लोहविकारे स्याद्, घटः कुम्भश्च मृन्मये ।
कबरः केशविन्यासे, नीलश्चौषधिदेहिनोः ॥ ५५

सूचस्तीक्ष्णे भाजने पात्रपारौ,
स्थालः कुम्भ्यां रेवती रोहिणीभे ।
ज्ञेयस्तालो लोहमय्यां विपञ्चः,
स्याद्वीणायां लोकवृन्दे च गोष्ठः ॥ ५६

श्लेषद्रव्ये खलो लक्ष्यो, विदारशठमोषधौ ।
दूतः सन्देशहारिण्यां, कुट्टिन्यां शम्भलो बुधैः ॥ ५७

मातङ्गानां स्नेहपानप्रकारे,
पीनः शालो बल्लभाया भगिन्याम् ।
फालः खण्डेऽथो खनित्रे कशश्च,
ज्ञेयः श्रोण्यां बुद्धिमद्भिः कटश्च ॥ ५८

लोहितश्रुवकतालिगु कक्षा बभ्रुवल्गुमनुसनुतलक्षाः ।
तण्डमण्डुकपिकन्थकवृक्षा मन्तुतन्तुतनुमङ्क्षुतरुक्षाः ॥ ५९

गुहलुः सशितः सङ्कुमनायीलिगुसम्बवः ।
वतण्डः शकलो मङ्कुलतुत्रृक्ष जिगीषवः ॥ ६०

यच्छब्दो मेनका चात्र, दण्डकापिप्पकेष्टकाः ।
रेवकाधारका चैव, द्वारकादेवकैरकाः ॥ ६१

क्षिपका धुवका चरका तत्सेवकया करकाचटके स्तः ।
अवकालहके अलका स्यात् कन्यकया ध्रुवकैडकया च ॥६२

## ॥ द्वितीयोऽध्यायः ॥

अर्धर्चध्वजकुञ्ज शीधु मधवो वर्चस्कूर्चाढकाः,
पङ्कानीकपिनाकनिष्ककपटाष्टङ्कः किरीटः कुटः ।
कूटः कङ्कटकर्बटाण्डशकटा वल्मीकसानू नटः,
खण्डोद्योगविडङ्गशृङ्गसरकाः पुङ्खव्रजौ मोदकः ॥ ६३

शाको मस्तकल्कशूकनिकटाः शुल्कं निदाघो नखो,
बाणद्रोणसुवर्णभूषणरणाः कार्षापणस्तोरणः ।
काण्डस्ताण्डवदण्डमण्डूपिटकाः सक्तुस्तडागव्रणौ,
पेटो मञ्चकवारबाणचरणा वस्त्राम्बरैरावताः ॥ ६४

चरकमठविटङ्कक्ष्वेडिता भूतवृत्त-
प्रयुतघृतवसन्ता हस्तबुस्तापराह्णाः ।
पलितफलककण्वा नामकर्माभिधाना-
ऽयुतशततृणनीडा यौवनोद्यानयानाः ॥ ६५

तीर्थप्रोथौ नलिनपुलिनस्तेनयोधौषधानि,
स्थानं शूर्पं निधनशयनद्वीपपुच्छायुधानि ।
यूथं गूथं कुणपकुतपक्षेमवर्णासनानि-
छत्राकाश प्रतिसरमुखाष्टापदारण्यवर्षाः ॥ ६६

कमण्डलुर्मण्डपकुट्टिमार्बुदा-ऽवतंसपाराः शतमानचन्दनौ ।
समानयूषौ दृढमूषिकौदना, दिनं विमानं च वितानलोहितौ ॥६७

अंसक्षीरकषायबिम्बविटपा नेत्राव्ययौ शेखरः,
केदाराश्रमशल्यशूलवलया बालस्तमालो मलः ।
गुल्माङ्गारविहारतोमररसाः पात्रं पवित्रं पुरं ।
मध्यं बुध्नमृणालमण्डलनला नालप्रवालोत्पलाः ॥ ६८

जृम्भो वज्रकबन्धकर्षककुदाश्वक्रान्धकाराङ्कुशा,
वक्त्रं सङ्गमदेहदाडिमहिमाः पत्रं बलं वल्कलम् ।
कर्पासामिषकाशकोशकुसुमप्रग्रीवमासेक्कसा,
निर्यासः कलशाम्बरीषकलला माषः करीषं कुशः ॥ ६९

मुसलमुकुलमूलाः पार्श्वपात्रीवपूर्वाः,
कमलहलचषालाः खण्डलं कुण्डलं च ।
निगडफलपलाला मङ्गलं शालशीले,
विषचषकविशालाः पूलतैले कपालम् ॥ ७०

समरतिमिरवारा राजसूयोपवासौ-
चमसदिवसकंसा वाजपेयो हिरण्यम् ।
जठरदरशरीरारावकान्तारराष्ट्राः,
पटहगृहकवाटाः कुक्कुटाद्रौ च धाम ॥ ७१

पद्माषाढकपित्थषष्टिककुलान्यम्भोजवाजामृताः,
स्थूलद्यूतखलीनलोहकवचशोकक्षयानेकपाः ।
शङ्खस्तण्डकधर्मचर्मरजतस्नेहासिहंसापराः,
सारः सैन्धवमध्यमाध्वरधनुर्मानिस्तनस्थाणवः ॥ ७२

महिमनेत्रकपञ्चकदण्डकाः, क्रकचशम्बलकुण्डपकन्दराः ।
कटकमालकमर्मरदैवताः, शिखरकेशरदारुभगन्दराः ॥ ७३

दीपोद्यमब्रह्मपिधानभावा वास्तुव्रतार्धप्रवरापिधानाः ।
अर्मो मुहूर्त्तं धनवप्रसौधा रैणुस्तलं लोम पटो विहायः ॥ ७४

उटजचापनपुंसकपातका भुवनकोटरपल्लवगोमयाः ।
अतिखरं हरिचन्दनमूलकौ भवनसङ्क्रमगाण्डिवपत्तना ॥७५

कर्पूरकुर्पासकषष्ट्युशीरा गाण्डीवनिष्ठेवसुपर्णभस्त्राः ।
पिण्याकपुस्तौ नखरेषुषण्डा वैनीतकं द्वीपिनमारकूटम् ॥ ७६

मञ्जीरनूपुरशफाणुतरण्डमेद्राः संसारचूर्णवतवासरजन्तुसत्त्वाः ।
कोलाहलः ककुभजानुभगाब्दवेषा,
वित्तस्वभूर्जलशुनाः शललं च गेहम् ॥ ७७

राजदन्तार्पितोतावक्लिन्नपक्वपरःशताः ।
नृवरोऽग्रेवणं भृष्टलुञ्चितो लिप्तवासितः ॥ ७८

उप्तगाढकुरुश्रेष्ठौ, सिक्तसंमृष्टसंयुतौ ।
उत्तमर्णाधमर्णौ च, परःसहस्र इत्यपि ॥ ७९

कुबेरकेशवौ श्रद्धातपसी विष्णुवासवौ ।
सोमरुद्रौ शिरोजानु चित्रास्वाती शिरोविजु ॥ ८०

जम्पती दम्पती जायापती पुत्रपती तथा ।
गौपालिधानपूलासविष्वक्सेनार्जुना मताः ॥ ८१

वैकारिमतं तण्डुलकिण्वावन्त्यश्मकाश्च दारगवम् ।
केशश्मश्रु स्नातकराजानौ नग्नमुषितश्च ॥ ८२

दृषदुपलं पुत्रपशू पूलासकुरण्डगाजवाजानि ।
आरट्वायनिचान्धनिसिञ्जास्थोशीरबीजानि ॥ ८३

विषयेन्द्रियाधरौष्ठाः स्थलपूलासं च दारजारौ च ।
भार्यापती उलूखलमुसलाक्षिभ्रुवगजाश्वशूद्रार्याः ॥ ८४

काकमयूरौ मेधातपसी दारार्थपाण्डुधृतराष्ट्राः ।
नरनारायणदीक्षातपसी चित्ररथबाल्हीकौ ॥ ८५

पूर्वोऽप्यर्थो धर्मतः शब्दकामात्,
इन्द्रार्कान्तेभ्योऽग्निचन्द्रादयोऽपि ।
भीष्मादित्यं द्रोणचन्द्राच्च राहो-
श्चन्द्रो ग्रीष्मो वा वसन्ताद्विभाव्यः ॥ ८६

शुक्रशुचिकरभरासभगुणवृद्धिसमीरणाग्निकुशकाशाः ।
सर्पिर्मधुदीर्घलघू सतपः श्रुतपाणिनीयरौढीयाः ॥ ८७

भीमसेनार्जुनावेतौ कपित्थाश्वत्थसंयुतौ ।
शकृन्मूत्रं कृतद्वन्द्वा व्यत्यासेन सतां मताः ॥ ८८

कडारः पिङ्गलो गौरो, भिक्षुकः खलतिस्तनुः ।
शौण्डः कुण्ठो वृकः खञ्जो, बठरो गड्डुलस्तथा ॥ ८९

वृद्धखोडाविमौ काणः कूटखेलौ च कीर्त्तितौ ।
आहिताग्निगतार्थोढभार्यपीतघृतप्रियाः ॥ ९०

जाताद्दन्तः सपुत्रोऽथ तैलं मद्यं च पीततः ।
गड्वादेः सप्तमी क्तान्तं जातिकालसुखादितः ॥ ९१

ज्ञेयो जातश्मश्रुः पीतदधिच्छिन्नशीर्षपीतविषाः ।
क्तः प्रहरणवाचिभ्यः सप्तम्यपि सम्मता विदुषाम् ॥ ९२

तिष्ठद्गु प्ररथं खलेबुसमधोनाभं समम्भूमि च
प्राह्णं पुण्यसमं वहद्गु विषमं प्रान्तं तथा निःषमम् ।
एकान्तं च समम्पदाति सुषमं तीर्थं समानात्परम्
पूतेनान्वितपूयमानखलतोरलूनाद्यवं वा बुशम् ॥ ९३

समपक्षं पापसमं समानतीरं प्रदक्षिणं प्रमृगम् ।
अपदक्षिणं च सम्प्रति वासंप्रति लूयमानयवम् ॥ ९४

संहृतसंह्रियमाणाद् बुसं यवं चायतीगवाविषमे ।
अपरायत्योश्च समं दुःषममिच्प्रत्यययोऽपि गणे ॥ ९५

ऊरीभ्रंशकलोररीगुलुगुधाधूसीस्वधाविःसजूर्-
धूलीध्वंसकलोरुरीमसमसाविक्लीफलीमस्मसाः ।
ताली संशकला फलू च शकला स्वाहा वषट्श्रौषटौ
वेताली च पशूपलीगुलुगुलातालीवितालीश्रुदः ॥ ९६

प्रादुः पाम्प्यालम्बीपाम्पालीसङ्कलाश्च केवाली ।
आलोष्ठी केवासी सेवाल्याक्ली च वार्दाली ॥ ९७

साक्षाद्बीजरुहानमःप्रसहनेचिन्ताविसो रोचना-
बीजर्य्या लवणं सह प्रतपने भद्रार्थयग्नावमाः .
अद्धा प्राजरुहोदकं विसहने मिथ्यार्द्रमास्थोऽष्टमः,
प्राजर्या च विकम्पने विहसने शीतंवशेप्रादुसः ॥ ९८

स्युर्याजकोद्वर्तककर्त्तृकारकाः प्रयोजकोत्सादकभर्तृवर्त्तकाः ।
अध्यापकस्नापकगोप्तृपूजका स्तुर्य्यः परेश्चारकवेषकाविमौ ॥९९

गणको रथपत्तिभ्यां, चतुर्थोन्मादकौ तथा ।
होता द्वित्रि च तीयान्तं, तुरीयोऽपि सतां मतः ॥ १००

शौण्डव्याडौ निपुणचपलौ पण्डितान्तःप्रवीणाः,
स्यात्संवीतः कुशलकितवाधीनधूर्त्तप्रधानम् ।
सव्यध्यानप्रवणविदिताः सारगुर्वायसाः स्युः,
सिद्धो बन्धः कटकविरसौ शेखरः शुष्कपक्वौ ॥ १०१

ड्यन्तात्पात्रात्समितबहुलौ गेहगोष्ठात्प्रगल्भ-
क्ष्वेडिन्नर्दिन्विजितिपटवः पण्डितव्याडशूराः ।

गर्भाच्छूरः सुहितसहितस्तृप्तदृप्तौ च धीरः-
पिण्डीशूरो व्रणकृमिरथो कूपमण्डूकयुक्तः ॥ १०२

गेहेनन्दी गृहकलविङ्को गेहेमेह्याखनिकबकौ च ।
गेहेवादी ननु नगरश्वा ज्ञेयः कर्णेटिरिटिरयासौ ॥ १०३

कर्णेचुरचुरा कूपकच्छपावटकच्छपाः ।
गेहेमेली गृहात्सर्पो नगरात्काकवायसौ ॥ १०४

मातरिपुरुषोदुम्बरमशकौ गेहेविचित्यपि प्रोक्तः ।
श्रमणाप्रव्रजिताथो कुलटा पटुना च मृदुनापि ॥ १०५

तापसीनिपुणादासीगर्भिण्यध्यापकाः स्मृताः ।
कुशलः पण्डितश्चात्र चपलश्चाभिरूपकः ॥ १०६

किंशुकः किंवदन्ती स्यात् किंकिरातश्च किन्नरः ।
किंपुरुषोऽथ किंदासः किंजल्काद्या बुधैर्मताः ॥ १०७

व्याघ्रः कुञ्चामाहिषरुरवः कुञ्जरेन्दू वराहः-
सिंहो वज्रं वृषभकलशौ चन्दनं पुण्डरीकः ।
चन्द्रः कुम्भर्षभकिसलयं पल्लवस्त्वृक्षपद्मौ,
हस्तिश्वानावृषितरुवृका बिम्बमप्यत्र लक्ष्यम् ॥ १०८

श्रेणिः पूगो निधननिपुणब्राह्मणाः पण्डितोऽथो,
मन्त्रो मुण्डो निचयचपलक्षत्रियाध्यापकाश्च ।
इन्द्रो देवः कृपणविशिपौ निर्धनोकौ पटुर्वा,
राशिर्भूतश्रमणकुशलाः कुन्दुमः स्याद्वदान्यः ॥ १०९

कृतमितभूतोदाहृतविश्रुतकलितावधारितोपकृताः ।
आस्थितनिराकृतोक्ताः संभावितमतविकल्पितासीनाः ॥ ११०

अवकल्पितो निरूपितविहितोपाकृतसमाज्ञाताः ।
आम्नातोदितदृष्टावज्ञातोदीरिताख्याताः ॥ १११

वृन्दारको वराहश्च, नागकुञ्जरपुङ्गवाः ।
वृषभव्याघ्रशार्दूल–हंससिंहर्षभादयः ॥ ११२

मतल्लिकोद्धमिश्राः स्युः प्रकाण्डस्थलभित्तयः ।
हस्तपाशतटाः पादः, पालीमचर्चिकादयः ॥ ११३

खसूचिखेटौ कितवोऽथ चौरमूर्खब्रुवास्तस्करदुर्दुरूटौ ।
धूर्तो विटः स्याद्धतकश्च भीरु–
श्चेलश्च जाल्मापसदौ च धृष्टः ॥ ११४

मयूराच्छत्रतश्छात्राद्व्यंसकः प्रेहिवाणिजा ।
कम्बोजाद्यवनान्मुण्डोऽथ प्रेहिस्वागता तथा ॥ ११५

एह्यपेहि क्रियापूर्वा, वाणिजा स्वागतापि च ।
द्वितीया विघसा चापि, प्रघसा प्रकसा तथा ॥ ११६

स्नात्वाकालकपीत्वास्थिरकाकिञ्चननिपत्यरोहिण्यः ।
आहरपूर्वाश्चेलावसनावनितास्तथा वितता ॥ ११७

एहीडं पचलवणा प्रोहकपर्दा निकुच्यकर्णिश्च ।
उद्धमचूडैहियवं भुक्त्वासुहितोद्धरावसृजे ॥ ११८

उच्चावचप्रोहकटोच्चनीचनिश्चप्रचाः कृन्द्धिविचक्षणा च ।
विचप्रचाचाचपराचयुक्ताऽकुतोभयाचोपचकांदिशीकाः ॥ ११९

उद्धपनिवपाथोद्धमविधमाहोपुरुषिकेहपञ्चम्यः ।
अहमहमिकायदृच्छोत्पचनिपचाः प्रोष्यपापीयान् ॥ १२०

आख्यातेनाख्यातं सातत्येऽन्यक्रियापदस्यार्थे ।
कर्त्तारञ्च ब्रूते हि कर्मणा बहुलमाभीक्ष्ण्ये ॥ १२१

एहिरेयाहिराभिन्द्धिलवणोत्पत्यपाकलाः ।
स्यादहंपूर्विका प्रोहकर्दमाथोद्धरोत्सृजा ॥ १२२

उत्पतनिपता श्यामा निषण्णपूर्वोन्मृजावमृजा ।
ज्ञेया त्वहंप्रथमिका प्रोह्यपदीहद्वितीये च ॥ १२३

दधिपयसी मधुसर्पिःसर्पिर्मधुरामलक्ष्मणा ज्ञेयाः ।
आद्यवसाने श्रद्धामेधे ऋक्सामवाङ्मनसे ॥ १२४

मेधादीक्षाश्रुतश्रद्धाध्ययनेभ्यस्तपः परम् ।
प्रवर्योपसदौ स्कन्दविशाखौ हरिवासवौ ॥ १२५

सूर्य्याचन्द्रमसौ सोमरुद्रौ नारदपर्वतौ ।
शुक्लकृष्णौ पितापुत्रौ ज्ञेयौ भीमार्जुनौ तथा ॥ १२६

मित्रावरुणौ मातापितरावथ कम्बलाश्वतरौ ।
सोलूखलमुसलाविह सपरिज्याकौशिकौ च गणे ॥ १२७

नरनारायणशिववैश्रवणा ब्रह्मप्रजापती चापि ।
अग्निषोमाविध्माबर्हिर्याज्यानुवाक्याद्याः ॥ १२८

गवाश्वाजाविकं कुब्जवामनं तु गवाविकम् ।
दर्भशरं श्वचण्डालं स्त्रीकुमारं तृणोलपम् ॥ १२९

दासीदासाजैडकदासीमाणवकपुत्रपौत्राणि ।
कुब्जकिरातोष्ट्रखरे मूत्रपुरीषं यकृन्मेदः ॥ १३०

अर्जुनपुरुषं शाटीपट्टिकम् उष्ट्रशशमूत्रशकृती च ।
भागवतीभागवतं तृणकाष्ठकुटीकुटे चापि ॥ १३१

मांसशोणितशब्दोऽपि, दर्भपूतीकसंयुतः ।
बालवृद्धं बुधैर्ज्ञेयमुपाध्यायश्च याजकात् ॥ १३२

हस्ती महेला गणिका कुसूल-
ङ्कटोलगण्डोलकटोलकाश्च ।
गण्डोलकाजौ च कपोतगण्डौ
कण्डोल कण्डोलकजालयुक्तौ ॥ १३३

कुम्भस्थूणाशतविकलशीविष्णुगोधैकदासी-
द्रोणीसूचीमुनिशुचिशकृत्कृष्णजालार्द्रनञ्त्रेः ।
सूत्राष्टम्यां कुणिगुणनिरः सूकरद्वेः षषश्च-
ञ्यन्तं पादं सुविहितपदादेशमेनं विदन्तु ॥ १३४

शरद्विपाशौ हिमवत्कियत्सदो
यद् दृग्विदो द्यौर्विडनोमनस्त्यदः ।
दिक्पथ्युपानच्चतुरस्तदाऽनडु
ज्जराजरोऽक्षि प्रतिसंपरानुतः ॥ १३५

उरः सर्पिर्मधूपानद्दधि शालिः पय पुमान् ।
अनड्वान्नौस्तथा लक्ष्मीर्नञ्पूर्वान्नित्यमर्थतः ॥ १३६

ज्ञेयौ द्विदण्डिसंहतपुच्छी द्विमुसलिनिकुच्यकर्णी च ।
आच्यपदिप्रोह्यपदी अन्तेवास्येकपदिसपदी ॥ १३७

अञ्जलिदन्तात्पाणेः कर्णाद्बाहोश्च हस्ततश्चापि ।
उभयोभध्वनिपूर्वादिज्विज्ञेयः परो गणतः ॥ १३८

प्रियाकान्तामनोज्ञास्वाकल्याणीभक्तिदुर्भगाः ।
सचिवावामनाक्षान्ताचपलानिचितासमाः ॥ १३९

सुभगा दुहिता बाल्या वामाथ तनया तथा ।
कुक्कुटाण्डमृगक्षीरकाकशावादयो मताः ॥ १४०

कोटरमिश्रकसिध्रकसारिकपुरगा गणे समाख्याताः ।
अञ्जनभञ्जनकिंशुकलोहितखञ्जा नलः शाल्वः ॥ १४१

किंशुलकशल्वपिङ्गलकुक्कुटयुक्तः शराहिवंशकुशाः ।
ऋषिकपिहनुमुनिधूमा वार्दः पद्मं शुचिर्मृगो वेटः ॥ १४२

अजिरस्थविरौ खदिरो मलयालङ्कारचक्रवाकाश्च ।
खपुरः शशाङ्कपुलिने हिरण्यकारण्डवकरीराः ॥ १४३

पृषोदराश्वत्थनखाः पलाशकपित्थदूणाशपिशाचदूढ्याः ।
विडौजसोलूकमृगौ गभस्तिबृहस्पतिद्वापरकांदिशीकाः ॥ १४४

पृषोद्वानबलीवर्ददूडाभवानमन्तराः ।
परःसहस्रदूडाशषोढातस्करषोडशाः ॥ १४५

अवटकुलटे प्रायश्चित्तं परःशतधूर्जटी-
पुरुषमहिषावश्वत्थामा बिडालबलाहकौ ।
भ्रमरवडवासीमन्ताश्च श्मशानमनीषिते-
मुसलकितवौ प्रायश्चित्तिः सृगालवनस्पती ॥ १४६

आशीविषपुरोडाशषड्ढानिर्ल्वयनीस्वराः ।
हेरम्बारग्वधावाढ्यषोडद्वाड्वलिमन्मथाः ॥ १४७

उलूखलोदूखलकुञ्जरा लुग् मृणालजीमूतमयूरसिंहाः ।
शकन्धुकर्कन्धुदधित्थवृस्यो महित्थपारापतमेखलाश्च ॥ १४८

दिवः स्थाने दिवोऽचि स्याद् दिव् च दीर्घे पुनः परे ।
उकारोकारयोरुच्च पश्चातोर्धादिके तलुक् ॥ १४९

पारस्करो देशविशेषवर्त्ती करस्करो राजतरौ गिरौ च ।
नद्यां रथस्पा प्रमितौ तु किष्कुः प्रतिष्कशः प्रष्ठसहायदूते ॥१५०

स्तः प्रस्कण्वहरिश्चन्द्रावृषावाश्चर्य्यमद्भूते ।
वर्चस्केऽवस्करो ज्ञेयो रथाङ्गे स्यादपस्करः ॥ १५१

कास्तीराजस्तुन्दास्कथानि नगरे गिरौ तु किष्किन्धः ।
मस्करिमस्करकारस्करास्तु मुनिवेणुवृक्षेषु ॥ १५२

आस्पदं स्यात्प्रतिष्ठायां क्रियाभीक्ष्ण्येऽपरस्पराः ।
आयुधे किष्कुरुः प्रोक्तः स्यात्कुस्तुम्बुरुरौषधे ॥ १५३

कन्दरा पूश्च किष्किन्धा कृतान्नमथ शष्कुली ।
गोष्पदं स्यात्प्रमाणादौ विकिरो विष्किरः खगे ॥ १५४

नभ्राण्नागनपान्नमेरुनकुला नासत्यनक्रौ तथा-
नाराचो नखनान्तरीयकयुतौ नक्षत्रनाकाविमौ ।
नारङ्गश्च नपुंसकेन कलितः स्यान्नाचिकेतस्तथा-
नग्नो नास्तिकनापितावपि नभो ज्ञेयो नवेदा गणे ॥ १५५

पक्षज्योतिर्जनपदपत्नीकरमानबन्धुगन्धाः स्युः ।
देशो रात्रिः पिण्डो नाभिः कुक्षिस्तथा वेणी ॥ १५६

रूपं वर्णो नामस्थाने, जातीयधर्मवचनानि ।
गोत्रं वयोऽपि लक्ष्यं, चन्द्रादिमते तु रूपादौ ॥ १५७

सुषामदुःषामनिषेधदुष्ठवो दुःषन्धिदुःषेधसुषेधसुष्ठवः ।
नौषेचिकादुन्दुभिषेचनान्तिषन्निः-
षामनिःषन्धिसुषन्ध्यपष्ठवः ॥ १५८

परमेष्ठी निःषेधः सव्येष्ठातामतश्च सव्येष्ठा ।
सुषमा सुषीमदिविषत्प्रतिष्णिकागौरिषक्थाश्च ॥ १५९

गिरेर्नदी नखो नद्धो, नितम्बो वक्रतो नदी ।
नितम्बस्तूर्य्यमाणस्तु, माषो नार्गयणावपि ॥ १६०

क्षुभ्नातृन्पू नन्दननर्त्तननृनमननिवासनृत्तानि ।
नन्दी निवेशनगरे गहनाग्नी सर्वनामनटौ ॥ १६१

ज्ञेयौ निवेशनानूपौ नदनो नरवाहनः ।
स्वर्भानुर्नदनद्यौ च क्षुभ्नादौ स्यान्नृतेर्यङि ॥ १६२

## ॥ तृतीयोऽध्यायः ॥

ब्रह्मा कलापितैतलिशिलालिलाङ्गलिशिखण्डिजाजलिनः ।
सूकरसद्मा कुथुमी सुपर्वणा पीठसर्पी च ॥ १६३

अनुशतिकपरस्त्रीसर्वलोकासिहत्याः -
कुरुकतशतकुम्भागारवेण्वस्यहत्याः ।
अनुरहदनुहोडावस्यहेतीहलोकाव्-
अभिगमपरलोकौ सर्वभूमिप्रयोगौ ॥ १६४

सुखशयनसर्वपुरुषावनुसंवत्सरयुतानुसंवरणम् ।
सूत्रनडतचतुर्विद्याकुरुपञ्चालाधिदेवाश्च ॥ १६५

बध्योगोदकशुद्धौ पुष्करसत्सङ्क्रमाधिभूताः स्युः ।
प्रतिभूरजातशत्रुः परिमण्डलराजपुरुषौ च ॥ १६६

एषोऽपि स्यात्सर्ववेदः सहण्यो
द्वारस्वः श्वोव्यल्कसस्वस्तयः स्वः ।

स्वग्रामश्वस्वादुमृद्द्वारपालाः
श्वादंष्ट्रा स्वाध्याययुक्तः स्वरश्च ॥ १६७

स्वागतस्वध्वरव्यङ्गा, व्यवहारो व्यडस्तथा ।
व्यायामस्वपतिस्वङ्गस्वजनाश्चात्र कीर्त्तिताः ॥ १६८

पैलौदञ्ची राहवी रावणिश्च दैवस्थानी राणिराहक्षिती च ।
औदभृज्जिः सात्यकिश्चौदमेघिः
सात्यंकामिः पैङ्गलोदायनिश्च ॥ १६९

शालङ्क्योदकशुद्धी भौलिङ्ग्यौदव्रजी तथौदन्यिः ।
औद्गाहमानियुक्तौदमज्जिरपि चौज्जिहानिः स्यात् ॥ १७०

तौल्वलिवैरकिधारणिपौष्पि बैल्वकिबान्धकिरावणिवैङ्कि ।
आसुरिनैमिषिनैवकियुक्तं दैवतिवार्कलिवैहतिभिश्च ॥ १७१

पौष्करसादिवैकर्ण्याहिंसिकारेणुपालयः ।
आसिबन्धकिवैशीतिदैवयज्ञासिनासयः ॥ १७२

दालीपिरानुतिश्च प्रादोहन्यानुराहती चापि ।
चाफट्टकिनैमिश्रिप्राडाहतिदैवमतयोऽपि ॥ १७३

प्रज्ञाश्रोत्रपिशाचचोरमरुतो रक्षश्चरित्रोशिजः-
प्रत्यक्षासुरशत्रुसंतपनसत्साधारणानुष्टुभः ।
चण्डालाशनिगोरजेतृजगतीसत्वद् द्वितादेवता-
श्चक्षुर्व्याकृतवन्धुयोधमधवो विद्यामनोजुह्वतः ॥ १७४

निगमवणिजौ गन्धर्वश्चाग्रहायणषोडतौ-
प्रकृतविदतौ क्रुङ्रक्षोघ्नो विघातचिकीर्षितौ ।

ततवसुकराग्नीध्रं विश्वानरो वरिवस्कृतो-
ऽनुषुकविकृते विड्वानुष्णिक्चरश्च कुतूहलम् ॥ १७५

नन्दामात्यडहालसंप्रतिवजाः कर्षापणत्रिष्टुभौ-
गायत्रीरवणोपचेयककुदैकाग्र्याटरूषास्तथा ।
संनाय्याग्रयणौ विधेयकुतुकागारद्विदत्पङ्क्तयः-
सत्वन्तुप्रतिभावियातसहसा वार्त्ता विदन्तोऽपि च ॥ १७६

वयश्चतुष्प्राश्यदशार्हयुक्तः परिप्लवः पुष्पकसंयुतश्च ।
कृष्णः कुरङ्गेऽनिमिषे विसारी
स्यादौषधं भेषज एव कामम् ॥ १७७

अनन्तसोमेतिहसर्ववेदाः सुखैकभावौ मणिकान्यभावौ ।
समीपसेनावसथद्विभावा मालोपमाभेषजसर्वविद्याः ॥ १७८

सर्वलोकचतुर्विद्याचतुराश्रमषड्गुणाः ।
भावशब्दस्वरा विद्यालोककालास्त्रितः परे ॥ १७९

हासप्रधानकवयः समानसन्निधितदर्थसमयुक्ताः ।
अथ चतुरो वर्णयुगौ शीलं शकटाङ्गजः प्राह ॥ १८०

आदिमध्यमुखान्ताग्रप्रमाणपार्श्वयत्तदः ।
सर्वविश्वोभयैकान्यवक्षःपूर्वेदमः स्वरः ॥ १८१

स्थूलश्चश्चत्पत्रमूलाणुमाषाश्चश्चश्चित्रं गन्धहस्तेषु चूर्णाः ।
पानं वर्णो मूलमुद्रार्धपादाः पिष्टः शूलं पल्लवः सूत्रपत्रे ॥१८२

हरितध्रुववाट्येक्षुमठमण्डपसङ्कुलाः ।
वाट्यकालावदातास्तु सुरायामुदितास्त्रयः ॥ १८३

तिलकालधान्यकालास्तिलमणिपुण्ड्रं बृहन्महच्चन्द्राः ।
एरण्डमधु कुमार्याः पुत्रश्वशुरौ च सञ्ज्ञायाम् ॥ १८४

अर्चासु पूजनार्थासु, चित्रकर्मनटध्वजे ।
चञ्चाखरकुटीदासी-वध्रिका नरि काश्यपः ॥ १८५

देवराजाजशङ्कुभ्यः करिसिन्धुशतात् पथः ।
सिद्धोष्ट्राभ्यां गतिग्रीवे वामाद्रज्जुः स्थलात्पथः ॥ १८६

यावाभिन्नतराविवत्समणयो लान्द्रप्रवालौ वट-
ज्ञाताज्ञातपटा घटो बहुतरः स्तम्बोऽथ पूलः पुटः ।
पीतप्रष्ठकुटाश्च नित्यवयसी सत्वदृशार्हाविमौ-
भिक्षुस्तब्धपिटास्थिपुण्यबधिरा दोलाभृतौ जानु च ॥ १८७

दानस्नातौ कुत्सितवेदसमाप्त्योरणुर्मतो निपुणे ।
लूनवियातौ च पशौ शीतोष्णमृतावनौरसे पुत्रः ॥ १८८

आच्छादने च बृहती, शून्यं रिक्ते तनुश्च सूत्रे स्यात् ।
क्रीडनकं च कुमार्य्याः, सञ्ज्ञाशब्दस्तथेयश्च ॥ १८९

शाखास्कन्दमुखाग्राणि, शरणं चरणोरसि ।
जघनं शृङ्गमेधाभ्रद्रुशिरः स्कन्धमेव च ॥ १९०

शर्करा लोमगोपुच्छगोलोमानि कपालिका ।
नराची शतपत्रं च पुण्डरीककपाटिके ॥ १९१

अङ्गुली रुरुहरी कपिबभ्रू कर्कमण्डरतरोमुनयश्च ।
शष्कुली कुलिशलोहितगोणीवल्गुमण्डलखला भरुजश्च ॥१९२

विनयविशेषसमूहाः समयात्ययसम्प्रदानसङ्गतयः ।
व्यवहारसमुत्कर्षाकस्मादनुगादिसङ्ग्रामाः ॥ १९३

सपदातिसमाचाराः समायमुक्ता कथञ्चिदुपचाराः ।
निर्मितह्रस्वादेशो बुधैरुपायध्वनिः कथितः ॥ १९४

काकतालं च खल्वाटबिल्वे चान्धकवर्त्तकम् ।
अर्धाच्च जरती श्येनात्कपोतो घुणतोऽक्षरम् ॥ १९५

पुरुषः शरतो ज्ञेयो, गोमयात्पायसं मतम् ।
कृपाणः स्यादजातश्च, शर्करोन्मज्जनं तथा ॥ १९६

पर्श्वसुरभरतरक्षोबह्लीकवयःपिशाचवसुमरुतः ।
सत्वदुशीनरकर्षापणास्त्रिगर्ताशनिदशार्हाः ॥ १९७

दामनिबैन्दवितुलभाः शात्रुंतपि सार्वसेनिकाकन्दि ।
सावित्रीपुत्रौडविमौञ्जायनकाकदन्तकयः ॥ १९८

औलपिराच्युतदन्तिः शाकुन्तकिराविदन्तिरौदङ्किः ।
ज्ञेयश्च बैजवापिर्बिन्दुश्चात्राच्युतन्तिश्च ॥ १९९

ब्राह्मगुप्तस्त्रिगर्तेषु, कौण्डोपरथजानकी ।
दाण्डकिर्जालमानिश्च, षष्ठः स्यात्क्रौष्टुकिस्तथा ॥ २००

कम्बोजो जवनश्चोलो मुरलः केरलः शकः .
खसो जर्तो व्युपापेभ्यो धारयश्च मतो बुधैः ॥ २०१

भर्गः करूषसुस्थालकश्मीराः केकयोरसौ ।
त्रिगर्त्तशाल्वकौरव्या, भरतोशीनरौ क्वचित् ॥ २०२

बाहुः स्यात्खरनादिपुष्करसदौ प्राकारमर्द्यर्जुनौ -
जङ्घाशृङ्खलतोदिबिन्दुशिरसः संकर्षणोदश्वितौ ।
चूडारामसुधामलोमवृकलाजीगर्तकृष्णानडुद्-
विज्ञेयाश्च वचाकुसप्तजलडाः साम्बोप्रवाकूपणी ॥ २०३

दुर्मित्रानुरहत्सुनामकृकलोदङ्कासुरा मूषिका–
पञ्चोदञ्चुकुनामसत्यकगदाः स्युः क्षेमधृत्वी सखा ।
प्रद्युम्नध्रुवकानिवाकुलहकासंसेविमध्यंदिना,
वल्मीकस्तृणविन्दुशूरधुवका उद्दालकाष्टारुणाः ॥ २०४

शर्मा देवाग्निमद्रेन्द्राद् उपबिन्दुसुधावतौ ।
अजधेनुर्बलाका स्यादुपबाहुयुधिष्ठिरौ ॥ २०५

उत्तानपादकश्यपविदाः सुमित्राथ नगरतो मर्दी ।
माषशराविच्छगलावटाकुभगलाशिवाकवो गलडा ॥ २०६

डत्वे षाडिः षषो भूयः सम्भूयोऽम्भोऽमितौजसाम् ।
सलोप उदकस्योदः कृताकारः शलङ्कु च ॥ २०७

व्यासः सुधातृवरुटौ निषादचण्डालबिम्बयुक्तौ च ।
कुरुशूर्पणायबृहतीकाराः कारो वडभ्याश्च ॥ २०८

ज्ञेया वाग्रथकारगर्गरमुराः कैशोरिचप्पट्टकौ,
सत्यंकारचफट्टकौ च हृदिकः कापिञ्जलादिः कविः ।
दामोष्णीषिकुटार्द्रवृक्षविमतिश्यापुत्रहन्त्रेरकास्
तक्षाशुभ्रशकन्धुशङ्कुपितृमच्छाकीनपिण्डीपुराः ॥ २०९

शाकः शलाकागणकारदभ्राः, पीलाभ्रवैवाकविभर्तृमूढाः ।
शालीनकर्त्रेजनितान्तवृक्षाऽजमारकश्यावरथाश्च वेनः ॥ २१०

वानुजिः कर्णकारश्च, केशिनीपथिकारिणौ ।
श्याप्रथो वान्तवृक्षश्च, श्यावनायश्च मञ्जुषः ॥ २११

शिवः प्रोष्ठश्चण्डो जटिलकवतण्डौ बधिरकः,
पिटाकस्तृक्षाकः पिटकपरिलौ प्रौष्ठिकमुनी ।

ककुत्स्थः खञ्जारस्तृणमसुरकर्णौ जलह्रदो,
विरूपाक्षः पिष्टः कहयवडवाभूमिककुभाः ॥ २१२

गङ्गाक्रुञ्चाकोकिलायस्कलह्या, द्रुह्यः पर्णः कर्णमञ्जीरकौ च ।
रेखस्तक्षा वर्त्तनाक्षः कहोडः,
सन्धिर्लेखोभूरिजम्भोर्णनाभाः ॥ २१३

दण्डो रोधः कोहितेलासपत्न्य आर्य्यश्वेतापर्षिकागोपिकाः स्युः।
खञ्जालश्वालेखनो ब्रह्मगुप्त-
श्चायःस्थूणः स्यान्नभागो विपाट् च ॥ २१४

भलन्दनानभिम्लानतृणकर्णकलापिनः ।
जरत्कारूः सुपिष्टश्च कुठारश्च खदूरकः ॥ २१५

विश्रवणरवणखञ्जनकुपिञ्जलपृथोत्क्षिपापुरोहितिकाः ।
कुरुपाण्डुहस्तिपादा वृष्णिकखर्जूरकर्णौ च ॥ २१६

उरलः कहूषकोहडहेहयगोपालिकाश्च गोफिलकः ।
परिषककुण्डोपरथौ त्रिवणादेशे सति त्रिवेणी च ॥ २१७

उत्कारूक्षीरह्रदौ सुरोहिकाकपिलिकर्ष्टिषेणाः स्युः ।
शुभ्रशलाकाशुकविशदेवतरा गन्धपिङ्गलाशकुनी ॥ २१८

कर्षो विष्टपुरः शकन्धिविधवाशालूकगोधाम्बिका-
लेखाभ्रूविकसाजबस्तिशकलाशोकाश्वबीजाश्मनः ।
गङ्गा पाण्डवभारताजिरदिशः शुक्रोग्रविग्रेतरा-
ऽणीवालीढसुदन्तभाणशतलाः कर्पूरकदू तुदः ॥ २१९

कुबेरिकान्यतरविमातृबन्धकी
कुमारिकाः परिधिमृकण्डुविश्रयः ।

किशोरिकाजरतिखदूररोहिणी
कुठारिकास्त्वतिथिसुदक्षवादनाः ॥ २२०

बलवर्दिशतद्वारशलाकाभ्रूशलाथलाः ।
अकशायो ऽनुदृष्टिश्च कृकलासप्रवाहणौ ॥ २२१

जीवभारमरुक्मिण्यो, वायुदत्तसुवक्षसौ ।
मृदुमृदौ सुदामा च, वासिष्टे श्यामलक्ष्मणौ ॥ २२२

गोदन्तकुशाम्बानिधिमकष्टुजिह्वाशिनः खडोन्मत्ताः ।
श्वब्रह्मकृतशताहरयमष्टवृष्टिकसुनामधर्मिण्यः ॥ २२३

कुषीतकविकर्णौ च, काश्यपे परिकीर्त्तितौ ।
कल्याणी सुभगा मध्या ज्येष्ठानुदृष्टिबन्धकी ॥ २२४

मध्यमा च परस्त्री च, प्रोक्तानुसृष्टिदुर्भगे ।
बलीवर्दी कनिष्ठा च, जारस्त्री जरती तथा ॥ २२५

गृष्टिर्हृष्टिस्तथा विश्रिर्वालिकुद्री च मित्रयुः ।
हल्यायुक्तोऽजबस्तिश्च गृष्ट्यादौ विदुषां मतः ॥ २२६

रेवती कुक्कुटाक्षश्च, ग्राहः कर्णवृकादिकः ।
मणिद्वाराश्वतः पाली, स्याद् वृकाद्बन्धुवञ्चिनौ ॥ २२७

वाकिनः काकलङ्के च, गाधेरश्चर्मिवर्मिणी ।
तथा कृतनलोपे स्तः, कार्कट्यश्च निगद्यते ॥ २२८

तिको यमुन्दौरससैन्धवोरसाः, संज्ञा शिखा देवरथोऽथ शल्यका।
शुभःसुयामाकुरुशीतलोमका,
गङ्गावरेण्यः कितवश्च तैतलः ॥ २२९

ग्राम्यामित्रोदन्यकौरव्यरूप्या, बालानीलौ वह्यकाखल्वके च ।
शाट्योयज्ञश्चन्द्रमालङ्कवश्च, दक्षश्चोखारूक्षगोकक्ष्यबन्धाः ॥२३०

ध्वजवदुतथ्यारथ्याः सुपामधैवरवसूरसारट्वाः ।
भौरिकिभौलिकिजाजलचैटयताश्चापि सैकयतः ॥ २३१

नडश्चरो बको मुञ्ज उपको लमको नरः ।
दासमित्रेतिकप्राणा द्वीपकिङ्करकातराः ॥ २३२

चटकखरपशोणा लङ्कसङ्कृत्यनाट्या
मिमतसुमतदुर्गब्रह्मदत्ताजलोहाः ।
तृणबदरकुमारस्तम्बचित्राग्रकाश्या-
श्चमसिशकटदण्डिन्निन्धजालन्धराश्च ॥ २३३

कामुकोदुम्बरौ सायकः किङ्कलस्त्या-
स्मको बालिशः पिङ्गरः पिङ्गलः ।
हंसकः कातलः काथलः काश्यपो
दण्डपाश्राध्वराः शिंशपाहस्तिनौ ॥ २३४

लिगुर्युगन्धरामित्रौ ब्राह्मणस्थिरकाश्वलाः ।
अग्निशर्मेतिशामुष्यपञ्चालाः सप्तलस्तिकः ॥ २३५

ऋग्जनवृषगणकाव्याः केकरसुमनःशणाश्च वाजव्यः ।
क्रोष्टृशलङ्कू लोपे ब्राह्मणवाशिष्ठयोश्च कृष्णरणौ ॥ २३६

हरितगविष्ठिरमठाराः किंदासो मित्रयुः सृदाकुश्च ।
बह्वस्कप्रतिबोधौ निषादशबरौ पृदाकुश्च ॥ २३७

बध्योगविष्णुवृद्धौ रथीतररथन्तरार्कलूषाः स्युः ।
दुहिता ननान्दृपुत्रौ गविष्ठिलो भूस्त्रियौ पुनः परतः ॥ २३८

अश्वग्रीवाचपलसुमनोग्रीष्मधूम्राः पवित्रा-
धर्म्यौ बैल्यार्जुनगिरिवनाः क्षान्तकाणौ विशालः ।
गोमी वाग्मिप्रहृतकितवाश्वक्ररामोदपादाः
खर्जूरार्कस्वनशिववविदाः श्यामगोलाङ्ककाशाः ॥ २३९

विश्वानरः पिङ्गलशूद्रकोत्सातवस्फुटा धन्यगदश्रविष्ठाः ।
जनाश्मवीक्ष्याः खदिरो नमार्ह-
पिञ्जूरवस्ताः सनखः पविन्दा ॥ २४०

रोहिणभण्डितभडिलाः शुनभण्डिलदासकानडुह्यं च ।
पुटकुटकुलखडभडिताः प्रादृतचुपकितविशंपदुर्मनसः ॥२४१

जडलतशङ्खप्राच्या ध्वनवहमन्दा भवेन्नरे जातः ।
अथ भर्गस्त्रैगर्त्ते स्यादात्रेये शपो भरद्वाजः ॥ २४२

विदोर्वकिन्दर्भकिलातधेनुविश्वानरा भाजनकश्यपौ च ।
अश्वावतानः प्रियकोपमन्यू हर्यश्वबिन्दू कुशिकर्त्तभागौ ॥ २४३

ऋष्टिषेणभरद्वाजापस्तम्बाः शुनकस्तथा ।
शरद्वत्सम्बकौ शिग्रुः कुचवारश्च कीर्त्तिताः ॥ २४४

कुञ्जब्रध्नशुभस्कन्दलोमस्कम्भाः शटो गणः ।
भस्मशङ्खविपाशश्च शुण्डा शाकश्च कीर्त्तिताः ॥ २४५

गर्गो वत्सविरोहितौ शटशकप्राचीनयोगावटा-
धूर्त्तः शङ्खधनञ्जयाजचमसा विश्वावसुः संकृतिः ।
वृक्षागस्त्यपुलस्तिवल्गुकलिता मन्तर्मनायी लिगुः-
सूनुर्लोहितकन्थकौ श्रुवलतू मण्डुर्जिगीषुस्तनुः ॥ २४६

तण्डोलूकवतण्डधूमशकलाः कण्ठस्तथा कुण्डिनी-
गोकक्षैकरहूगणा वृषगणः स्थूराररााकाकताः ।
गोलन्दानडुहौ तरुक्षभिषजौ कृष्णौऽलिगुः पिङ्गला-
पूतीमाषसुलाभिनौ कुरुकतः शङ्कुस्तितिक्षैकलूः ॥ २४७

चुलुकचणकमङ्क्षुः शर्कराक्षाग्निवेशौ-
चिकितकुटिलदृभाः पिप्पलूतृक्षकक्षौ ।
महितमुसलरेभाः शण्डिलोक्थौ च गण्डु-
र्विदभृदभयजाताविन्द्रहूतित्तिरी च ॥ २४८

बृहदग्निसवर्णर्क्षजमदग्निपराशराः ।
जतूकर्णः कुटीगुश्च कर्कटाश्मरथौ मनुः ॥ २४९

पर्णवल्कस्तलुक्षश्च, यज्ञावल्कश्च मन्द्रितः ।
व्याघ्रपाद्भिषा देवहूस्तन्तुभण्डितमुद्गलाः ॥ २५०

आङ्गिरसे बोधकपी ब्राह्मणकुशिकाङ्गजे च मधुबभ्रू ।
वाजोऽसे जरमाणो भडितासंकृतितितिम्भवामरथाः ॥ २५१

गुहलुर्मनसो मङ्क्षु पिङ्गभिष्णजसम्बवः ।
आलापीकृतवीरश्चाभिजिदादिस्तथा गणः ॥ २५२

## ॥ चतुर्थोऽध्यायः ॥

धनं सेना पशुक्षेत्रे, धान्यप्राणसभागृहाः ।
शताश्वधन्वराष्ट्राधिकुलधर्मगणास्तथा ॥ २५३

उत्सोशीनरभल्लकीयविकारा धेनूदपानोष्णिहः-
पञ्चालापवदौ महानदपृथे इन्द्रावसानः कुरुः ।

सत्वद्ग्रीष्मरथन्तरं जनपदो मध्यंदिनानुष्टुभौ-
त्रिष्टुप्पङ्क्तिमहानसाश्च भरतो ज्ञेयः सुवर्णः ककुप् ॥ २५४

बृहतीजगतीमहिमत्तरुणास्तलुनो महन्महाप्राणौ ।
विनदबृहत्पीलुकुणा वृषदंशो बष्कयश्चासे ॥ २५५

देशे तूदस्थानो हंसपथं वर्धमानमहितौ च ।
दंशं कुरुकतकुणपावुत्सादिगणे पठन्त्येके ॥ २५६

भिक्षाखण्डिकदक्षिणायुवतयो धर्मी सहस्रो युगं-
क्षेत्रं श्वा हलबन्धभिक्षुकशुकोलूकाः पदातिः पुनः ।
अङ्गारो वडबाऽथ पद्धतिरहोऽथर्वा करीषं तथा-
चर्मी चर्म च गर्भिणी युगवरत्रा स्याद्वरत्रा तथा ॥ २५७

केदाराजौ राजराजन्यवत्सा उष्ट्रौरभ्रौ वृद्धयुक्तो मनुष्यः ।
उक्षा ज्ञेयो राजपुत्रस्तथेह केदारादौ वामनाचार्य्यदृष्टे ॥ २५८

पाशधूमतृणाङ्गाराः पिटाकः पिटको वनम् ।
गोरथौ शकटं वातः खलपोतौ गलो नडः ॥ २५९

हलं जनः पटाकश्च, ज्ञेयः पोटगलोऽपरैः ।
खलोकौ कुन्दुमोऽन्येऽपि, स्युः खलादौ प्रयोगतः ॥ २६०

तालो धनुषि पीयूक्षा, कण्टकारी त्रिकण्टकः ।
श्यामाकपाटलाकाण्डा, गौधूमेन्द्राविशाविमौ ॥ २६१

बर्हिणेन्द्रालिशौ मुञ्जो बिल्ववेणुगवेधुकाः ।
कुटीरव्रीहिकर्पासीकर्कन्धूर्शिशपेक्षवः ॥ २६२

चयखदिरमसूरान् सीसकंसौ शिरीषें ।
रजतचमरलोहान् पीतदारुं पलाशम् ।

अपि च वचकरीरेन्द्रायुधस्पन्दनानि ।
शृणु तदनु यवासोदुम्बरं तीव्रदारुम् ॥ २६३

विकङ्कतश्च पूलासो रोहितकविभीतकौ ।
व्याघ्रकाञ्चनमर्थे स्याद्विकारेऽवयवे तथा ॥ २६४

शरदर्भकुटीसोमा, भवेतां तृणबल्वजौ ।
स्तो राजन्यात्मकामेयौ, वैकर्णश्च वसातिना ॥ २६५

बाभ्रव्यानृतदेवयातवयुतो दाक्षायणो वातव-
स्तीव्रोदुम्बरमालवार्जुनफणः पुत्रोऽम्बरीषात्परः ।
शालङ्कायनदाक्षितेलुकलितौ वैराटशैलूषकौ-
त्रैगर्त्तश्च वसानबैल्ववनकौ स्यात्संप्रियस्तैल्वलः ॥ २६६

भौरिकिसैकयतावथ चैकयतो भौलिकिश्च काणेयः ।
चौपयतश्चैटयतो वाणिजको वालिकाज्यश्च ॥ २६७

ऐषुकारिः शयण्डश्च, सौवीरो वैश्वमानवः ।
दासमित्रिर्नडः शौण्डः, शायाण्डो वैश्वधेनवः ॥ २६८

द्व्यक्षत्र्यक्षौ दासमित्रौडचान्द्राः
खाडः शौद्रो दाक्षिसारस्यजौलाः ।
शायण्डोऽथो ताक्ष्यर्शौभ्रौ फणन्ता
एते ज्ञेया विश्वतुण्डाच्च देवः ॥ २६९

नडप्लक्षकपोतेक्षुकाष्ठत्रिवेत्रवेतसाः ।
कृतह्रस्वन्लुचौ क्रुञ्चातक्षाणौ बिल्ववेणु च ॥ २७०

अश्मयूथनददर्भशिखोषा वृन्दकन्दगुदकाण्डकुलानि ।
मीनगह्वगुडकुण्डलखण्डाः पीनपामनगकोटगुहाश्च ॥ २७१

सखीकरवीराशोका वासवसख्यग्निवायुतो दत्तः ।
छगलो गोफिलदत्तौ भल्लः पुरपालवज्राश्च ॥ २७२

कदलस्तमालरोहौ सप्तलचक्रौ कुशीरकः सरकः ।
सुरसः सीकरसमलौ सरमसरसवीरचक्रवाकाश्च ॥ २७३

सङ्काशकश्मीरपचारनासाश्चूडारयूपौ पलितानुनाशौ ।
मन्दारकूटौ दशकोविदारशीर्षाश्मतीर्थांशमडारकुम्भाः ॥ २७४

नाशिकासरकसूरचिरन्ताः कम्पिलः समलखण्डितसीराः ।
पञ्जरप्रगदिनाथनलाङ्गा रोमलोमपुलिना मगदी च ॥ २७५

सुपरिः कटिपः कलिवो मलिनागस्ती सकर्णको वृष्टिः ।
पन्थादेशः सुपथी मादितविकरौ च सूरसेनश्च ॥ २७६

बलश्चुलः पुलोलौ च नलो दुलदलौ वनम् ।
वडशब्दः कुलं मूलं लकुलोरलसंयुतम् ॥ २७७

पक्षतुषचित्रकुम्भाः कुण्डो मकराण्डहंसका रोम ।
लोमसुवर्णकसमलाः कम्बलिकाकुत्ससकलाश्च ॥ २७८

पन्थादेशे विहिते पन्थिन्शब्दो निगद्यते कृतिभिः ।
यमलबिलहस्तिहस्ताः सिंहकसरकौ खिलास्त्यतिश्वानः ॥ २७९

सीरको लोमकः सीर्ष–निवातौ च सकर्णकः ।
अंशुकः सरसः पाकः, सहको वलिकः कला ॥ २८०

कर्णार्कजीवन्तजवानडुह्या आण्डीवतोऽथ द्रुपदश्च जैत्रः ।
स्फिगर्कलूषाकनपाञ्चजन्याः
कुन्ती वशिष्ठः कुलिशश्च जित्वा ॥ २८१

ज्ञेयाः सुतङ्गमाजिरजीवार्जुनविप्रचित्तमुनिचित्ताः ।
श्वन्शुक्रमहापुत्राः खण्डिककर्णौ महाचित्तः ॥ २८२

बीजवापिस्वनश्वेतगडिकाविग्रविग्रहौ ।
एषां सुतङ्गमादित्वादिञूचे चातुरर्थिकः ॥ २८३

वराहबाहू अथ शर्करा निमग्नः शिरीषश्च तथाविदग्धः ।
ज्ञेयो वलाहः खदिरो विभग्नः
स्थूलः पलाशः पिनिनद्धबद्धौ ॥ २८४

कुमुदं कुण्डलकूटौ मुनिस्थलाश्वत्थघासकुन्दाश्च ।
मधुकर्णदशग्रामौ शाल्मलिरथकारगोमठशिरीषाः ॥ २८५

अरीहणोद्दण्डविपाशशिंशपाभलन्दनोदञ्चनखाण्डवीरणाः ।
सुयज्ञजम्बूकशकृत्स्नरैवताः
शिरीषबिल्वौ बधिरोऽथ जाम्बवान् ॥ २८६

खाडगौमतमैत्रोष्ट्रत्रैगर्ता वैमतस्तथा ।
शाण्डिल्यसांपरौ भास्त्र आयनान्ता अमी मताः ॥ २८७

खदिरो विपथः खण्डुर्भगलो द्रुघणस्तथा ।
सुशर्मकनलोलन्दा रायस्पोषश्च वीरणः ॥ २८८

किरणो यज्ञदत्तश्च, दलता सौमतायनः ।
कौष्ट्रधौमतसौमैन्द्रसौसकौद्राः फणन्तकाः ॥ २८९

कृशाश्वकूटाजिनवेश्मलोमशा विशालधूमौ सुकरश्च वर्चलः ।
अरिष्टमौद्गल्यपराशरारुषः सुवर्चलारिश्मपुरारसूकराः ॥२९०

अवनतसदृशायोरोमका लोमकश्च
प्रतरसुखविवित्कासायसाः पूतरश्च ।

विनतपुरगदासीपूकराः पूगरश्चा-
ऽजिनतसतुलवेष्येरोऽरसा धूकरश्च ॥ २९१

विकुट्यासासुरावेतो शबलश्चाभितो जनः ।
रोमाशश्च कृशाश्वादौ ज्ञेयाश्छण्प्रत्ययान्विते ॥ २९२

ऋश्यस्थूलनिलीनकर्दमशरा बाहुर्निधानाशनि-
न्यग्रोधाः परिगूढखण्डखदिरा वेणुः सितः शर्करा ।
अश्मांशू परिवंशवीरणमता वेश्मोपगूढाविमौ,
दण्डश्चानडुहोत्तराश्म परितो वृत्तो निबन्धारडू ॥ २९३

बल्वजः कूपबीजे च यवासेक्कटकङ्कटाः ।
शिरीषः शकटाश्वत्थपरिवापविकङ्कतम् ॥ २९४

शर्कराऽथ दशग्रामो, न्यग्रोधः कुमुदं कचः ।
मध्यश्वसङ्कटा गर्त-निर्यासौ गदिताविह ॥ २९५

काशपाशतृणाश्वत्थाः पलाशवनकङ्कटाः ।
वासकर्दमपीयूक्षा गुहाकर्पूरबर्बराः ॥ २९६

मधुरग्रहवच्छूलाः कपित्थश्चरणो बिसः ।
नडोऽथ जतुसीपालौ गणे काशादिसंज्ञिते ॥ २९७

तृणमूलसुवर्णार्णा वराणवर्णौ वनार्जुनौ पर्णम् ।
नडबलबिलबुलचरणा बुसः फलं चात्र विज्ञेयम् ॥ २९८

प्रेक्षा स्यात्परिवापसङ्कटकटाः कूपो यवासः पुटः-
संलक्ष्या ध्रुवका महश्च धुवका कैश्चित्कपिः कोविदैः ।
ज्ञेयः कङ्कटबन्धुकापुकबुका गर्तेक्कटौ कूपको-
न्यग्रोधक्षिपकाहिरण्यफलकाः प्रेक्षादिरेवं गणः ॥ २९९

मध्विक्षू शररोमवेणुमरुतः शक्तीष्टकारिष्टयो-
वार्दालीशकलाकरीरकिशरासन्दीशलाकाहिमाः ।
स्थाणुस्तक्षशिलाबिसासुतिशमीसर्याणपार्दामिषी-
कर्कन्धूवटवेटऋष्यरुमणो वल्मीकपीडाखडाः ॥ ३००

उत्कराश्मखदिरास्तृणवृक्षाविन्द्रवृक्षतिकपिप्पलशाकाः ।
आर्द्रवृक्षकपलाशसुवर्णश्यावनायसहिता विजिगीषा ॥ ३०१

शालानेकखलाजिनातपफला जन्याजिनं पिप्पली-
मूलं संपरशूर्पणायपिचुका भस्त्रा च नैवाकवः ।
उत्क्रोशार्कनितान्तवृक्षशफरा गर्त्ताग्निवैराकणाः-
काशारण्यनिशान्तपर्णकितवाः क्षुद्राणकक्षान्तयः ॥ ३०२

अश्वत्थनीचापकशङ्कुरेडावरोहितक्षारविशालवेत्राः ।
अरीहणत्रैवणचर्मखण्डवातागराः सम्पलमन्त्रणार्हौ ॥ ३०३

शौनकोऽथ तलवाजसनेयौ रज्जुकण्ठकठशाठकषायाः ।
स्कन्धसाङ्गरवतुम्बुरुताण्ड्या रज्जुभारकमलारुणयश्च ॥ ३०४

हरिद्रुशाष्पेयपलिङ्गयुक्ताः शापेयखाडायनदेवदर्शाः ।
श्यामायनालम्बिऋचाभदण्डाः
स्तम्भोलपौ स्तः परुषांसकश्च ॥ ३०५

उक्थन्यासवसन्तयज्ञशिशिरं चर्चा पुराणं गणः -
सञ्ज्ञातर्कपदक्रमाश्च गणितं लक्ष्यं च लोकायतम् ।
आयुर्वेदगुणेतिहासचरमं हेमन्तहेतू यजु-
र्वर्षाज्योतिषसंहिता शरदथो सङ्घाटवृत्तीतरम् ॥ ३०६

श्लक्ष्णानुसूलक्षणसङ्ग्रहाः स्युग्रीष्मो निरुक्तं पुनरुक्तमत्र ।
आथर्वणोऽथ प्रथमानुकल्पौ क्रमेतरन्यायकृतान्ततन्त्रम् ॥३०७

अनुगुणवर्षाशरदद्विपदा भारतपदेपदानुपदम् ।
अनुलक्ष्याख्यानं स्याद्विशेषपरिषन्मुहूर्त्तमप्येके ॥ ३०८

सुलक्षब्राह्मणावेतौ, पदोत्तरपदादिकाः ।
असंसर्गाङ्गधर्मत्रिक्षत्राद्विद्या परा मता ॥ ३०९

कल्पलक्षणसूत्रान्तमकल्पादिमतं बुधैः ।
आख्यानाख्यायिकावाची श्लुग्द्विगोः सर्वसादितः ॥ ३१०

क्रमः शिक्षा पदं चैव, मीमांसा सामसंयुता ।
उपनिषत्तथा ज्ञेया, गणे क्रमादिसञ्ज्ञिते ॥ ३११

## ॥ पञ्चमोऽध्यायः ॥

अध्यात्ममुक्तीहपरत्रशेषाकस्मादमुत्रोर्ध्वदमाधिदेवाः ।
ऊर्ध्वदमश्चोर्ध्वमुहूर्त्तसर्वलोकावमुष्मिन्नधिभूतनिष्ठाः ॥ ३१२

स्यात्समानस्तदादिश्च तथा लोकः परेहतः ।
ऊर्ध्वोर्ध्वमः परो देहोऽध्यात्मादिराकृतिगणः ॥ ३१३

नदीपावापुरो मावा, श्रावस्ती धातकी मही ।
वनाद्वासी च कौशाम्बी, शाल्वाथो वडबा वृषे ॥ ३१४

कौशाम्बी वनसेतकी गिरिगरी वाराणसी खादिरी
दार्वा काशफरी च पूर्वनगरी नद्यादिरेवं गणः ।
कत्त्रिः कुण्डिनपुष्करौ च नगरीकुम्भ्युम्भिमाहिष्मती
वर्मत्योऽथ च पौदनो निगदितो ग्रामस्तथा पुष्कलः ॥ ३१५

कुण्ड्याकुड्ये ग्रामात्कुण्ड्याकुण्यावल्ये वन्यामुल्ये ।
उख्यातृण्ये भाण्ड्योवुल्ये प्राज्ञैः प्रोक्ते यल्लोपे च ॥ ३१६

गहानृशंसी समशुक्लपक्षौ खाडायनानन्तरपार्श्वतोऽन्याः ।
इष्वपसाड्यन्तरभौजिबैज्या-
ध्यश्वीष्वनीकैकपलाशिकाङ्गाः ॥ ३१७

अन्तस्थोत्तमदैवशर्मिविषमव्याड्यासुरिश्रौतयः-
शौङ्गिः शैशिरिपूर्वपक्षमगधा दन्तायकाठेरणी ।
मत्वर्थापरपक्षमुत्तरकतौ वाल्मीकिवाराटकी-
कामप्रस्थसमानशाखमुखतोऽवस्यन्दनामित्रयः ॥ ३१८

एकाधमोत्तमाच्छाखो ग्रामश्चैकसमानतः ।
लावेरण्यग्निशर्माणावाहिंस्येकतसौ तथा ॥ ३१९

क्षैमधृत्विश्च सौमित्रिरेकवृक्षौपबिन्दवी ।
हंसवङ्गौ तथाश्वत्थितन्त्वग्रौद्गाहमानयः ॥ ३२०

कुट् च स्वराजपरजनदेवानां णिच्छ वेणुकादिभ्यः ।
प्रस्थोत्तरपदवेत्रकमध्योत्तरकाश्च मध्यमिका ॥ ३२१

काश्यच्युतौ मोदनमोदमानौ गौवासनारिन्दमदेवदत्ताः ।
संवाहसां याति च हस्तिकर्षूः कुनामचेदीकरणं हिरण्यम् ॥ ३२२

शकुलाददशग्रामौ हिरण्यकरणस्तथा ।
सिन्धुदाससुधासोमच्छागान्मित्रस्तथा सधात् ॥ ३२३

युवदेवोपतो राजः, कालात्कोपादिपूर्वतः ।
शौवावतानभारङ्गी, अरित्रो भोजसम्मतः ॥ ३२४

पलदी गोमती गोष्ठी, परिखा परिषत्तथा ।
बाहीकः शूरसेनश्च, नैकती च पटच्चरः ॥ ३२५

बहोः कमलजालाभ्यां, कालात्कीटोऽथ रोमकः ।
सकृल्लोमोदपानौ च, कमलात्कीकरो भिदा ॥ ३२६

कच्छः कुलूतः परिसिन्धुसाल्वौ गन्धारसिन्धू स्थलसिन्धुवर्णू ।
कश्मीररङ्कु कुरुसक्तुसिन्धू विजापकद्वीपकुलानुषण्डाः ॥३२७

अङ्गारानूपकम्बोजा, रज्जुकर्णुविरूपकाः ।
मधुमानन्तरीपश्च वापवाहाबजात्परौ ॥ ३२८

धूमार्जुनावावयगर्त्तघोषाःषडण्डसाकेतशशादनाश्च ।
संस्तीयतीर्थारुणमित्रवर्चाद्वीपान्तरीपोज्जयनीविदेहाः ॥ ३२९

सत्रासाहनर्त्तपाठेयपल्ल्यः शष्पाराज्यौ धार्त्तराज्ञी च कुक्षिः ।
द्व्याहावत्र्याहावपाथेयवर्ज्या आञ्जीकूलो माठरो बर्बरश्च ॥३३०

दक्षिणापथपट्टारौ, समुद्रो नौमनुष्ययोः ।
मद्रकूलं च भक्षाली, राजशब्दात्स्थलीगृहे ॥ ३३१

माहकादानकान्माषाद्घोषमानाट्टमद्रकात् ।
दाण्डायनसमुद्राभ्यां, स्थलीशब्दः परो मतः ॥ ३३२

अर्जुनवातण्डायनविनादवणियावसायवाटूराः ।
कूलात्सौवीरेष्विमकान्तशकुन्तीकषायाश्च ॥ ३३३

सन्ध्या पञ्चदशी शश्वदमावास्या त्रयोदशी ।
प्रतिपत्सन्धिवेलाऽथ, पौर्णमासी चतुर्दशी ॥ ३३४

अश्मपादाशनिह्लादपिशाचाः शकुनिर्जयः ।
त्सर्वाकर्षपिचण्डाश्च निचयश्च नयो ह्रदः ॥ ३३५

कथेक्षुमांसौदनवृत्तिसंग्रहाः प्रवाससङ्घातनिवाससक्तवः ।
गुडो वितण्डाजनवादवेणवो
गणोपवासौ विकथागुणाविमौ ॥ ३३६

आयुर्वेदजनेवादौ, सङ्ग्रामापूपसङ्कथाः ।
विश्वात्कथा च कुल्माषो, जनोवादोऽथ कुष्ठवित् ॥ ३३७

जनः प्रतिमहद्विश्वपञ्चसर्वानुतः कुलम् ।
परामुष्यपरस्येभ्यः समेदं सम्पराद्युगः ॥ ३३८

दिग्वर्गपूगा गणपक्षमेधा, वंशानुवंशौ वनमित्रमेघाः ।
धाय्यादिसाक्ष्यन्तरवेशकाशा, अब्यूथकालान्तरहोमुखाश्च ॥ ३३९

अमित्रजघनालीका, आकाशाकालपथ्युखाः ।
माघन्यायकशा देशः, सञ्ज्ञायामुदकं तथा ॥ ३४०

मुखोलूखलसीरौष्ठहनुशीलरथाः परेः ।
उपात्स्थूलाकलापौ च स्थानसीरादि सम्मतम् ॥ ३४१

पदयूपवंशसीताः पथितिलमाषाः ससातयवभङ्गाः ।
गङ्गासीरे सरथे सर्वेऽप्येतेऽनुतो लक्ष्याः ॥ ३४२

ऋगयनपुनरुक्तन्यायशिक्षानिमित्ता
उपनिषदृषियज्ञश्लक्ष्णचर्चामुहूर्त्ताः ।
अपि निगमनिरुक्तोत्पातसंवत्सराव्या-
करणमथपद्व्याख्यानविद्यात्रिविद्याः ॥ ३४३

छन्दसो विजितिर्भाषा-मानं विचितिनामनी ।
क्षत्राङ्गवास्तुतो विद्या, स्यादुत्पादः क्रमेतरः ॥ ३४४

ऋग्ब्राह्मणाध्वराख्यातनामाख्यातानि नाम च ।
आद्यन्तप्रथमावेतौ षत्वणत्वनतानतौ ॥ ३४५

शुण्डिकोलपतीर्थान्युदपानतृणभूमयः ।
कृकणस्थण्डिलौ पर्णोपतीर्थोदकपिप्पलाः ॥ ३४६

कुलालसेनोपनिषन्निषादा मधुश्वपाकौ रुरुदेवराजौ ।
रुद्रो वधूब्राह्मणकुम्भकाराः कर्मारचण्डालयुतः सिरिन्ध्रः ॥३४७

अनड्वान्परिषच्चैव, सैरिन्ध्री वरुटस्तथा ।
अक्प्रत्यययुजो ज्ञेयाः, सञ्ज्ञायां बुधपुङ्गवैः ॥ ३४८

......
असुरो देवरक्षोभ्यां, गुणान्मुख्यः परो मतः ॥ ३४९

शिशुप्रद्युम्नसीतेन्द्रयमाद् यथाक्रमं मताः ।
क्रन्दोऽभिगमनं चैवान्वेषणं जननं सभः ॥ ३५०

सिन्धुस्तक्षशिलावसानदरदो गान्धारशाल्वोरसाः-
कर्णः सामलकाण्डधारच्छगलाः कैर्मेदुरो ग्रामणीः ।
कंसार्धासनसिंहकर्णमधुमत्कश्मीरसिंहा इमे-
स्याद्वत्सोद्धरणोऽथ बर्बरयुतो वर्णुस्तथा किन्नरः ॥ ३५१

गब्दिकावासकम्बोज-क्रोष्टुकर्णसुमङ्गलाः ।
सङ्कुचितोऽथ किष्किन्धा, पर्वतोऽपि निगद्यते ॥ ३५२

शुण्डिका कुचवारोऽथ, सर्वसेनशटौ शकः ।
सर्वकेशरहौ बोधश्चणकः शङ्खशङ्करौ ॥ ३५३

कर्णाक्षिकेशा नखपादगुल्फभ्रूशृङ्गदन्तौष्ठमुखास्यपृष्ठम् ।
कर्णादिरेषोऽथ च पीलुशम्यावश्वत्थकर्कन्धुकरीरयुक्तौ ॥३५४

कुवलं बदरं पुष्प-कर्कन्धूखदिरास्तथा ।
बदरीकुवलीशब्दौ, शाकटायनसम्मतौ ॥ ३५५

रैवतिकबैजवापी गौरग्रीविस्तथौदमेधिश्च ।
स्वापिपिशिरथौदवापिः परिपठितः क्षैमवृत्तिश्च ॥ ३५६

गोहविःखरदरासुरमेधा अष्टकायुगखदाविषकूपौ ।
स्नुक्स्खदाध्वसहिताक्षरवेदाऊ-
धसोऽनङि नभेऽपि च नाभेः ॥ ३५७

शुनो यण इति ज्ञेयं, दीर्घत्वं च विभाषया ।
कूर्पवीजक्षरादीस-बर्हिः शब्दौ मताविह ॥ ३५८

अपूपयूपौ कटकोऽथ किण्वः सूपौदनौ तण्डुलकर्णवेष्टौ ।
अवोषदीपौ पृथुकश्च पत्रं स्थूणार्गलाश्वा मुसलोऽपि पूपः ॥३५९

## ॥ षष्ठोऽध्यायः ॥

संशयषष्ठान्नव्रतभारतरामायणैकभक्तानि ।
अष्टममासक्षपणोपवासपारायणानि स्युः ॥ ३६०

अजशङ्कूत्तरा वारि कान्तारस्थलजङ्गलाः ।
ऋतुस्तथोपवस्ता च, प्राशिता च बुधैर्मतः ॥ ३६१

सन्तापसङ्घातनिसर्गयोगोपवाससम्पादनसम्परायाः ।
सङ्ग्रामसंयोगविसर्गमांसप्रवासमांसौदनसन्निपाताः ॥ ३६२

सन्नाहौदनसंवेशसक्तुसम्मोदनं निरः ।
पेषघोषावुपात्सर्गः पेषवासक्रमाः समाः ॥ ३६३

व्युष्टोपवासौ परिषत्प्रवासौ सङ्ग्रामतीर्थं समुदायनित्यम् ।
प्रवेशनो निष्क्रमणः समोऽग्ने-
र्घातः पदं पीलुपरं च मूलम् ॥ ३६४

चूडा श्रद्धा द्वादशाहस्तथायं, ज्ञेया यात्रा देवतीर्थात्परेह ।
स्वर्गः कामो वोधनायुर्यशांस्य-
नेको लक्ष्यो धीमता लक्ष्यतश्च ॥ ३६५

उदुपाभ्यां परात्स्थापेरनोऽनोः प्रवचेर्वचेः ।
विशेर्वासेस्तथाङ्प्राच्च रुहेः समाविशेरभेः ॥ ३६६

विशेः पदे रुहेः पूरेः, समापेश्च सपूर्वतः ।
स्वस्तिवाचनं पुण्याह-वाचनं शान्तिवाचनम् ॥ ३६७

देवतिलदेशविरतेर्महतः सामायिकाह्वतं गदितम् ।
दीक्षाऽवान्तरपूर्वा त्रिश्रुतिकाः स्युर्महानाम्न्यः ॥ ३६८

अश्ववस्वश्मभङ्गोमावर्षोर्णागणमित्यपि ।
वंशबल्वजमूलाक्षस्थूणाखट्वाकुटेक्षवः ॥ ३६९

छेदं भेदं सम्प्रयोगं विकर्षं दोहद्रोहौ विप्रकर्षप्रकर्षौ ।
कर्षं नर्त्त विप्रयोगप्रयोगौ-
संवेः प्रश्नं प्रेषणं विद्धि विद्वन् ॥ ३७०

दण्डार्घमेधामुसलानि मेघो वधोदकेभा मधुपर्कयुक्ताः ।
युगं कशासौ पितृदेवता च दण्डादिरेवं विबुधैः प्रणीतः ॥३७१

सुस्नाताभ्युन्नती बन्धुमैत्री निद्रा सुखात्परा ।
सुखाच्छय्या तपो रात्रिर्दिवसः शयनं शयः ॥ ३७२

परदारा गुरोस्तल्पं, माथोत्तरपदं तथा ।
पदव्यनुपदाक्रन्द-जन्ययात्राः प्रकीर्त्तिताः ॥ ३७३

प्रभूतस्वागतस्वस्तिपर्याप्तागमनं स्वरः ।
नित्यमाकार्यतः शब्दः प्रभूतादिगणे मतः ॥ ३७४

पर्पाश्वत्थावाकषजालव्यासारथाश्वघासाः स्युः ।
कृतपद्भावः पादो निर्दिष्टोऽर्थध्वनिः कैश्चित् ॥ ३७५

स्युर्वेतनप्रेषणशक्तिदण्डवाहार्धवाहोपनिषत्सुखानि ।
वेश्मोपवस्ती भृतिपादवेशो-
पवेशशय्याः स्फिगचालजालम् ॥ ३७६

उपदेशधनुर्दण्डोपनिजस्तधनुःस्फिजः ।
उपाच्च हस्तिवेषस्थस्थानान्युपास्तिरित्यपि ॥ ३७७

उत्सङ्गपिटकावुक्तावुट्टपोत्तुपसंयुतौ ।
उडुपोऽथ पिटाकश्च स्यादुत्पुटोत्पुतौ तथा ॥ ३७८

प्रोक्ता भस्त्रा भरणं शीर्षभारः शीर्षेभारो भरटश्चांसभारः ।
अंसेभारः करणं पङ्क्भारो-
ज्ञेयः प्राज्ञैः करटोऽन्येऽपि शब्दाः ॥ ३७९

अक्षद्यूतोऽथ जङ्घाप्राद्धतं हृतं गतागतम् ।
पादस्वेदनं यातोपयातं कण्टकमर्दनम् ॥ ३८०

शर्करामर्दनं सत्त्वावागङ्गानुगतानि च ।
अन्येऽपि ध्वनयो लक्ष्या, अक्षद्यूतादिनामनि ॥ ३८१

निकटो भिक्षुके वृक्ष–मूलमावसथस्तथा ।
श्मशानाभ्रावकाशौ च, निकटादौ बुधैर्मतौ ॥ ३८२

महिषी मणिपाली प्रानोर्लेपिका पुरोहितः ।
प्रजापतिप्रजावत्यनुचारकविलेपिकाः ॥ ३८३

यजमानोऽनुवाकश्च, नरो वर्णकपेषिका ।
शक्तियष्ट्यष्टमा दण्ड ईषेष्टी कम्पनाम्भसी ॥ ३८४

छत्रं चुराप्ररोहौ च, विशिकाविशिखे तथा ।
अनृतं स्यादुदस्थानं, पुरोडा कृषिसंयुता ॥ ३८५

भक्षाशिक्षाविश्वधाकर्मभिक्षाविक्षाचुक्षामन्द्रसत्यास्तितिक्षा ।
स्थोपस्थानं वा तपः स्याद्बुभुक्षा
छत्रादिर्विज्ञायतामेष दक्षैः ॥ ३८६

किशरस्तगरोशीरपर्णीहरिद्रुगुग्गुलु ।
हरिद्रानलदावेतौ, स्थगलो नरदस्तथा ॥ ३८७

## ॥ सप्तमोऽध्यायः ॥

तारकाकुसुमपल्लववेगाः पुष्पगौरवविचारपिपासाः ।
मञ्जरीस्तबकवर्णकतन्द्रा दुःखशास्त्रसुखमूत्रतरङ्गाः ॥ ३८८

निद्रामुद्रापुलकतिलकाश्चन्द्रकाभ्रान्धकारा–
गर्वोत्कण्ठामुकुलमुकुरद्रोहदोहा बुभुक्षा ।
हर्षोत्कर्षव्रणकुवलयव्याधिगर्धाः पुरीषं
क्षुत्सीमन्तज्वरभरगरा रागरोमाञ्चरोगाः ॥ ३८९

पण्डा कन्दलकज्जलं किसलयं तृट्कण्टकं कोरकः,
कल्लोलस्थपुटं कुतूहलफलं चाङ्गारकः कञ्चुकः ।

शृङ्गाराङ्कुरशैवलानि बकुलश्वभ्रप्रचारास्तथा,
वर्मारालकलङ्ककर्दमयुतं श्रद्धा ऋजीषं मतम् ॥ ३९०

सञ्ज्ञाकुड्मलमूर्छानिष्क्रमणाङ्गारहस्तकोच्चाराः ।
प्रतिबिम्बविघ्नतन्त्रप्रत्ययदीक्षा भवेद्गर्जा ॥ ३९१

पृथ्वाशुप्रियपाण्डुचण्डपटवः खण्डूरुखण्डाणवः-
साधुः स्वादुमृदू महल्लघुतनुक्षिप्राणि वृद्धो गुरुः ।
वक्राकिञ्चनचारुपाकबहवो वत्सर्जुतृप्राणि च-
क्षुद्रः कालवृषौ महिश्च बहुलं ह्रस्वोऽथ होडः कृडुः ॥ ३९२

दृढपरिवृढौ मूकश्चुक्रो विशारदसम्मती-
बधिरमधुरौ वालो मूलं कलो जडपण्डितौ ।
लवणतरुणावुष्णः शीतः स्थिराम्लकृशावृढो-
विमतिविमनोमन्दा मूर्खो वियातभृशं तथा ॥ ३९३

विलातः स्यात्तथा शुक्र-दीर्घसम्मनसो मताः ।
ताम्रमाम्रं तथा तृष्णां, प्राह श्रीशाकटायनः ॥ ३९४

ब्राह्मणो वाडबो धूर्त्तः कुशलालसबालिशाः ।
सममध्यपुरोभ्यः स्थः, कविर्नुञ्चार्हतो मतः ॥ ३९५

निपुणचपलचोरास्तत्परेदंपरौस्तः-
सुहितपिशुनदीना माणवोऽथ प्रकामम् ।
उचितगडुलशीला निष्कुलो दुष्कुलः स्यात्-
तरतमविषमस्थावेकभावान्यभावौ ॥ ३९६

विदग्धदायादयथापुराद्विभावा यथाकामयथातथौ च ।
विराधयः कापुरुषस्वभावाभीक्ष्णं समग्राधिपतित्रिभावाः ॥३९७

ज्येष्ठश्रेष्ठप्रकटनिकटा विश्वरूपाभिरूपौ-
साक्षी तत्स्थश्चतुरपरमस्थेतिहाः शीर्षघाती ।
ऋत्विक् सम्राड् गणपतिमहाराजसंवादिदूताः-
सात्मस्तेनौ सुकरसदृशौ मानुषाराधयौ च ॥ ३९८

पूर्वापरं दुष्पुरुषो विशायो विशालसंवेशिविघातिनश्च ।
स्वाराजसम्भाषिविशस्तयो-
ऽपीश्वराभिजातौ परिमण्डलश्च ॥ ३९९

परिशेषराजपुरुषौ युगपत्प्रतिकूलनास्तिकपुनःपुनरः ।
प्रतिभूसुराधबहुभाषिपरम्परमुत्तराधरसधर्मवणिक् ॥ ४००

जनराजसमाचारपरिख्यातोपराधयः ।
युवराजयथात्मानुपूर्वहोडनिघातिनः ॥ ४०१

पुरोहितग्रामिकचर्मिकास्तिकाः-
स्वस्थोऽथ शौण्डीरविधर्मकर्मिकाः ।
बालानुकूलं शिलिकोऽथ सूचिकः
संरक्षसारथ्यधिराजदण्डिकाः ॥ ४०२

पर्षिकवर्मिकचौक्षोदासीनाः खण्डिकस्तथाञ्जनिकः ।
प्रविकाञ्जलिकच्छत्रिकसूचकविश्वस्तविफलाश्च ॥ ४०३

क्षेत्रज्ञोऽथ यथातथपिशुनविदूरा यथापुरनृशंसौ ।
कुशलेश्वरनिपुणा अपि नञ्पूर्वाः सूरभिः कथिताः ॥ ४०४

युवमिथुनकुलीनभ्रातृसुस्त्रीप्रशास्तृ-
स्थविरचपलदुःस्त्रीदुष्ठवो होतृसुष्ठु ।

कुतुककितवकुस्त्रीकर्तृसब्रह्मचारि-
श्रमणनिपुणवध्वध्वर्यवः कन्दुकश्च ॥ ४०५

कुशलवृषलौ क्षेत्रज्ञोऽथानृशंसकुतूहलम्-
पिशुनसुहृदावुवन्नेताथो सहश्च कमण्डलुः ।
अपि च हृदयं दुःसोः पत्तेरथाद्गणकस्तथा-
हृदयपुरुषौ ज्ञेयावेतौ समासविपर्यये ॥ ४०६

परिव्राजकसुभ्रातृसुभगोद्गातृहायनाः ।
यजमानोऽथ भर्ता च दुर्भ्रातृविपुलौ दुर्हृत् ॥ ४०७

प्रतिहर्त्ता तथा पोता, यलोपः श्रोत्रियस्य च ।
वृषपूर्वं गणं प्राह, वामनस्तु तपस्विनि ॥ ४०८

मनोज्ञमेधाव्यभिरूपवृद्धाः कल्याणचोरप्रियरूपधूर्त्ताः ।
आढ्यस्तथा श्रोत्रियसारपत्राश्छात्रो युवच्छान्दसविश्वदेवाः ॥४०९

बहुलामुष्यकुलादोरूपावश्यङ्कुपुत्रकुलपुत्राः ।
पुत्रकुमारकुलाला, ग्रामात्सण्डश्च सुकुमारः ॥ ४१०

इष्टार्चितौ निपठितागणितावकीर्ण-
पूर्त्तोपसादितगृहीतनिराकृताश्च ।
संरक्षितानुपठितोपकृतानुयुक्ता-
म्नातश्रुतानुगणितास्त्ववकल्पितं च ॥ ४११

आसेवितपरिरक्षितनिकथितगणितोद्गृहीतपरिकलिताः ।
उपपादितपरिगदितौ सङ्कलिताधीतपरिगणिताः ॥ ४१२

अवगणितव्याकुलितौ निषादितोपाकृतावमुक्ताश्च ।
अवधारितपठितकृता निगदितमनुगुणितमायुक्तम् ॥ ४१३

यवोर्मिवासाकृमिभूमिबन्धवः क्रुञ्चाककुत्कान्तिहरीन्दुबिन्दवः।
हनुस्तिमीक्षू मधुसानुभानवोद्रा-
क्षाहरिच्छिम्बिगरुद्द्रुचारवः ॥ ४१४

वत्वन्तमुदन्नष्ठीचक्रीकक्षीरुमण्विवो ज्ञेयम् ।
राजन्वान्सौराज्ये ज्योत्स्ना चर्मण्वती नाम्नि ॥ ४१५

ज्योत्स्नाशब्दस्तमिस्रा च, कुतुपः स्याद्विपादिका ।
विसर्पो नखरश्चापि, कुण्डलोऽपि मतो बुधैः ॥ ४१६

पिच्छोदरव्रीहिगुहाः पिचण्डस्तुन्दोदकोरोयवचूर्णपक्षाः ।
वर्णग्रहौ पङ्ककले च काकप्रज्ञे तुफेनो धुवका च पर्णम् ॥४१७

सिध्मस्नेहौ पांसुपृथुश्यामचटूनि
प्रज्ञाग्रन्थी बीजकपीपिङ्गमृदू च ।
कर्णः शीतं मांसहनू मञ्जुगडू स्तः
पत्रं नाभिः श्रीमणिकण्डूदककृष्णाः ॥ ४१८

सक्थि श्लेष्मा पित्तनिष्पाद्धमन्यः
पेशः पार्ष्णी वातनिष्पावपुष्काः ।
पार्श्वस्तुण्डिः पक्ष्मपर्शू कुशः स्याद्
धारासक्तू वर्ध्मफेनोष्मपर्णम् ॥ ४१९

क्षुद्रजन्तूपतापाभ्यां, प्राण्यङ्गादात एव च ।
कालाघाटाजटाः क्षेपे, वातादेरुङपि स्मृतः ॥ ४२०

लोमवस्तुमुनिः कर्को, गिरिबभ्रू हरिः कपिः ।
लोमादौ विबुधैर्ज्ञेया, रुरू रोम तथाभुरुः ॥ ४२१

पामा वामा वलिः श्लेष्मा, सामहेमोष्मकद्रवः ।
कल्याणादङ्गशब्दाच्च, लक्ष्म्या अच्च कृमिस्तथा ॥ ४२२

विष्वचो कृतसन्धिः स्याल्लुक् पदस्योत्तरस्य च ।
शाकीदद्रूपलालीनां, हृ(हृ?)स्वत्वं च स्मृतं बुधैः ॥ ४२३

बलफलपरिणाहोद्दाममालाबलाका-
व्रतनिचुलमनीषामेखलामानशाखाः ।
कुलमुकुलपताकाकर्मचर्मप्रयामाः
स्तबककवडबचूडायामवीणोपयामाः ॥ ४२४

कूलं जरोत्साहघृणोलदंष्ट्रा व्यायामधन्वोद्यमवर्मकेकाः ।
सञ्ज्ञाशिखारोहगदावरोहाः पुलाष्टकायासमुलानि सूना ॥४२५

मणिर्विषुर्बिम्बहिरण्यराज्यो मताः कुमारः कुररेष्टकार्णाः ।
गाण्डी धनुर्गाण्ड्यजके च नाम्नि
पतञ्जलिर्नेच्छति गाण्डिशब्दम् ॥ ४२६

सुखप्रतीपप्रणयास्त्रसोढास्तृ-प्रास्त्रकृच्छ्रा दलशीलकक्षाः ।
अलीकदुःखे कृपणं हलं स्यात्
क्षेपे तु माला करुणश्च शोफः ॥ ४२७

पुष्करो नडतमालहिरण्यकैरवाणि कुमुदं च शिरीषम् ।
कर्दमस्तटतरङ्गकपित्थाः पङ्कजोत्पलकरीषसरोजम् ॥ ४२८

राजीवनालीकसरोरुहाणि मृणालपद्मं पुटकारविन्दम् ।
अम्भोजमब्जं कमलं विगर्हः कल्लोलशालूकबिसं यवासः ॥४२९

कृष्यासुतीभ्रातृशिखापितासावुत्साहपुत्रौ परिषच्च माता ।
उत्सङ्गपर्षद्रजसोऽथदन्तः
कृष्यादिसञ्ज्ञे गदिता गणेऽस्मिन् ॥ ४३०

ऊषनखपांसुकुञ्जाःखपाण्डुमधुसिन्धु(बन्धु) नगमुष्का ।
पुष्कं कण्डुमुखशुषिनिर्मित ह्रस्वा तथा कच्छूः ॥ ४३१

अर्शोऽभ्रतुन्दचतुरा बलकर्दमोरः,
कामाम्लतुण्डलवणाः पलितं जटा च ।
घाटाघटे अघसुरे अपि शुक्रपद्मे,
स्वाङ्गाच्च हीनगुणतः परतश्च वर्णात् ॥ ४३२

विमुक्तदेवासुरसत्त्वदग्ना-विष्णूर्वशीडामरुतो महित्री ।
सुपर्णरक्षोवसुवृत्रहन्तृदशार्णरक्षोऽसुरबर्हवन्तः ॥ ४३३

उपसद्वयोऽस्यहत्याः सोमापूषापतत्रिवसुमन्तौ ।
परिसारको दशार्हः पत्नीवानथ हविर्धानः ॥ ४३४

गोषद्देवस्यत्वादेवीरापस्तदेवकृष्णोऽस्यौ ।
देवींधियप्रतूर्णेषेत्वारक्षोहणोशानाः ॥ ४३५

वाचस्पतिः कृशानुश्च, स्वाहाप्राणोऽञ्जनं तथा ।
पत्त्वासहस्रशीर्षं च, मातरिश्वा च घोषदा ॥ ४३६

## ॥ अष्टमोऽध्यायः ॥

कण्डूञ्मेधातुरणभुरणा गद्गदो दुःखवेदौ-
केलालाटौ समरभिषजौ तन्तसो मन्तुवल्गू ।
एलावेलासपरमगधाः पम्पसेरोमहीडः-
खेलालोटावुरणचरणासूषसो वेड्हृणीङौ ॥ ४३७

रेखाम्बरेयोद्रवसः सुखेरजौ भिष्णक्तिरोलाडिषुधेरधोऽगदः ।
लेखालिटौ लेट् चुरणाररोरसो-
वेटाऽथलोटातरणौ तथा पयः ॥ ४३८

सम्भूयोभरणौ नन्द-पुराणौ कुषुभेमसौ ।
ईयस्पुष्पौ तथा गोधा, चित्रङाश्चर्य इष्यते ॥ ४३९

भृशतृपञ्चपलाण्डररेहतो हरितपण्डितकण्डररेफतः ।
अभिमनःशुचिदुर्मनसोजसः सुमनसोन्मनसोत्सुकवेहतौ ॥४४०

शीघ्रं फेनो नीलमन्दौ च वर्चः संश्चन्मद्रौ भद्रयुक्तौ भृशादौ ।
शब्दाटाट्याकण्वमेधाभ्रकोटाः
पोटासोटाशुभ्रनीहारशीकाः ॥ ४४१

सुदिनं दुर्दिनं युद्धं, वैराटाटाट्टशीकराः ।
प्लुष्वावेगौघकण्ड्वाटा ममश्च कलहो मतः ॥ ४४२

लोहितश्यामदुःखानि, हर्षगर्वसुखानि च ।
मूर्च्छानिद्राकृपाधूमाः, करुणा जिह्मचर्मणी ॥ ४४३

सुखदुःखास्त्रकृच्छ्राणि, प्रतीपः करुणस्तथा ।
कृपा चालीकतृप्रास्त्र-कृपणाः सोढसंयुता: ॥ ४४४

ग्रहस्निहौ वदं दीधी–भणौ रणपठौ कुचम् ।
लिखं च कम्पमन्दोलि–मुम्भि लोचं मथिं विदुः ॥ ४४५

वारतर्परगराः शरभेरे कन्दरः करभमण्डरकाराः ।
रघ्वरं कपरिकाङ्कुरिरेखा रोमकर्मपुरुषासुररिक्षाः ॥ ४४६

पांसुरकरीरमूरं तिर्पिरिकातरुणशुक्रपर्य्यङ्काः ।
परियोगमुकुरसरिरं रोहितपरिघौ सरोहिण्यौ ॥ ४४७

समादितः पदिं सदिं विदिं नहिं वृषिं प्रुषिम् ।
इणं वृतिं यतिं श्रुवं स्नुवं भरिं विदेन्धिना ॥ ४४८

क्रुधिं युधिं क्षुधिं तृषिं त्वषिं रुषिं रुजं शुचम् ।
ऋचिं मुदिं मृदिं गिरिं ह्रियं भियं लुवं भुवम् ॥ ४४९

कृञं भिदिं छिदिं नुदिं दृशिं नशिं युजिं ज्वरम् ।
अवं त्वरं श्रिवं मवं शकिं नुवं विदुर्बुधाः ॥ ४५०

भिदिं छिदिं विदिं दयिं रुजिं मृजिं प्रछिं चुरिम् ।
अनामनि क्षिपिं तथा गुहिं तुलिं वसिं वपिम् ॥ ४५१

क्षपिं क्षियं रिखिं लिखिं शुभिं सिधिं मिधिं गुधिम् ।
अरिं गदिं धृञं तरिं करिं हरिं खिदिं विदुः ॥ ४५२

नन्दिर्वासिर्वर्धिनर्दी च रोचि–र्दूषिर्भीषिर्भूषिशोभी मदिश्च ।
साधिर्ण्यन्ताः सर्व एते च नाम्नि
क्रन्दिः कर्षिः स्यात्समोहर्षियुक्तः ॥ ४५३

रमिरुचिकृतितपितृदिपूदहिसहियुक्ता जुजल्पिदमयः स्युः ।
सञ्ज्ञायां लवणोऽथो आद्याद्दम्यर्दिनाशिसूदिमतम् ॥ ४५४

पचं पतं वदं वशं व्रणं रणं क्षमं भृञम् ।
वृञं गुपिं सृपिं नृतिं दृशिं मिषिं मिधिं विदुः ॥ ४५५

मिहिदिहिरुहयो नदभषदिवयः सिविचोरिगाहिगृचिलयः ।
तृदृचरयः सूदिस्कन्दी शिषिदृभिवहप्लुदंशाः स्युः ॥ ४५६

ग्रहिसम्मर्दी मन्त्रिः स्याद् अपराधिरवरुध्युपरुधिस्थाः ।
ह्रस्वो वाभ्वः परिवेरुत्पूर्वा भासिदसिसहयः ॥ ४५७

श्रुविशौ वपिरक्षी शावसिशीङ्श्च नेः पराः ।
याचिसंव्यावह्व्याह्वव्रजा वदवसौ नञः ॥ ४५८

नञ्पूर्वादेव स्यादचश्च धातोरचित्तकर्तृकतः ।
अभिवेर्भुवस्तु भूते विशयीविषयी च देशे स्यात् ॥ ४५९

मूलविभुजो महीध्रः पृथ्व्यादिभ्यो रुहश्च विज्ञेयः ।
स्त्र्याख्योषर्बुधनखमुचकुमुदं दायादकाकगुहौ ॥ ४६०

पू.आ.श्री जिनदेवसूरिविरचितः

## ॥ हैमनाममालाशिलोञ्छः ॥

अर्हं बीजं नमस्कृत्य गुरूणामुपदेशतः ।
श्रीहैमनाममालायाः शिलोञ्छः क्रियते मया ॥ १

सर्वीय इत्यपि जिने शम्भवे सम्भवोऽपि च ।
श्रीसुव्रते मुनिरपि नेमौ नेमीत्यपीष्यते ॥ २

षष्ठे गणेशे मण्डितपुत्रोऽपि कथितो बुधैः ।
मरुदेव्यपि विज्ञेया युगादिजिनमातरि ॥ ३

चक्रेश्वर्यामप्रतिचक्राऽपि अजिता च कविभिरजितबला ।
श्यामा त्वच्युतदेव्यपि सुतारकोक्ता सुताराऽपि ॥ ४

भद्रकृत् तीर्थकृद् भद्रः श्रमणः श्रवणोऽपि च ।
भद्रे भन्द्रमपि प्राहुः प्रशस्तमपि कोविदाः ॥ ५

प्रव्रजनं परिव्रज्या शिष्योऽन्तिषदपि स्मृतः ।
इति प्रथमकाण्डस्य शिलोञ्छोऽयं समर्थितः ॥ ६

व्योमयानमपि प्रोक्तं विमानं बुधपुङ्गवैः ।
स्यात्समुद्रनवनीतं पेयूषमपि चामृतम् ॥ ७

कथ्यन्ते व्यन्तरा वानमन्तरा अपि सूरिभिः ।
द्योतिस्तथा वृष्णिपृष्णी प्रोक्ता रश्म्यभिधायकाः ॥ ८

समुद्रनवनीतं च विदुश्चन्द्रमसं बुधाः ।
चन्द्रिका चन्द्रिमाऽपि स्यात् इल्वला इन्विका अपि ॥ ९

अनूराधाप्यनुराधा गुरुः सप्तर्षिजोऽपि च ।
सौरिः सौरोऽपि राहुस्तु ग्रहकल्लोल इत्यपि ॥ १०

अभ्रपिशाचोऽपि तथा नाडिका नालिकाऽपि च ।
रात्रौ यामवती तुङ्गी निःसम्पातो निशीथवत् ॥ ११

तमः स्यादन्धातमसं वर्षाः स्युर्वरिषा अपि ।
खेऽन्तरीक्षं सांसृष्टिकमपि तत्कालजे फले ॥ १२

मेघमाला कालिकाऽपि वार्दलं चापि दुर्दिनम् ।
सूत्रामाऽपीन्द्रे शतारः शतधारोऽपि चाशनौ ॥ १३

आश्विनेयौ स्वर्गवैद्यौ हर्यक्षोऽपि धनाधिपः ।
अजगवमजगावमपि शङ्करधन्वनि ॥ १४

गौर्यां दाक्षायणीश्वर्यौ नारायणे जलेशयः ।
कौमोदकी कौपोदकी आ ई शब्दौ श्रियां मतौ ॥ १५

कन्तुः कन्दर्पे सिद्धार्थः सुगते परिकीर्त्तितः ।
अङ्गे व्याख्याविवाहाभ्यां प्रज्ञप्तिरपि पञ्चमे ॥ १६

दृष्टिपातो द्वादशाङ्गे कल्याणेऽवन्ध्यमपि अथ ।
निन्दा गर्हा जुगुप्सा अथाऽऽक्षारणा रतगालिषु ॥ १७

समाख्यापि समाज्ञावत् रुशतीवद् रिशत्यपि ।
काल्यापि कल्या सन्धायां समाधिरपि कथ्यते ॥ १८

व्रीडः शूका मन्दाक्ष्यं च ह्रियाम् ऊहाऽपि चोहवत् ।
तन्द्रिस्तन्द्री च निद्रायाम् अहम्प्रथमिकाऽपि च ॥ १९

अहम्पूर्विकायां केलिकिलोऽपि स्याद् विदूषके ।
मार्षवन्मारिषोऽपि इति शिलोञ्छो देवकाण्डगः ॥ २०

स्तनन्ध्ये स्तनपश्च क्षीरपश्चाऽभिधीयते ।
तारुण्यं स्याद् यौवनिका दशमीस्थो जरत्तरः ॥ २१

कविताऽपि कविः स्यात्, कृतकर्मणि कृतकृत्यकृतिकृतार्थाश्च ।
कुटिलाशयोऽपि कुचरः अन्धजडशठेऽनेडमूकः स्यात् ॥ २२

वदान्यौ पृथगित्यन्ये दानशीलप्रियंवदौ ।
मूर्खो यथोद्गतोऽपि इभ्यः श्रीमानपि बुधैः स्मृतः ॥ २३

विवधिक-वीवधिकावपि वैवधिके प्रतिचरोऽपि भृत्ये स्यात् ।
सम्मार्जको बहुकरे बहुधान्यार्जक इति प्राहुः ॥ २४

विहङ्गिकायां च विहङ्गमाऽपि, अथौर्ध्वदेहिके ।
और्ध्वदैहिकमप्याहुः अनृजुः शण्ठ इत्यपि ॥ २५

मायावि–मायिकौ धूर्ते कपटे तूपधा मता ।
चोरश्चौरोऽपि विज्ञेयः स्तेयं स्तैन्यमपीष्यते ॥ २६

दाने प्रादेशनमपि क्षमा स्यात् क्षान्तिरित्यपि ।
क्रोधनः कोपनः तृष्णक् पिपासितोऽपि कथ्यते ॥ २७

भक्षकः स्यादाशिरोऽपि मार्जिता चापि मर्जिता ।
पेयूषमपि पीयूषं कूचिकाऽपि च कूर्चिका ॥ २८

द्रप्से द्रप्स्यमपि प्रोक्तं विजिपलं च पिच्छिले ।
व्योषे त्रिकटुकं जग्धौ जमनं जवनं तथा ॥ २९

आघ्राणोऽपि भवेत् तृप्तः शौष्कलः पिशिताशिनि ।
मनोराज्यमनोगव्यावपि स्यातां मनोरथे ॥ ३०

कामुके कमनोऽपि स्यात् आक्षारितोऽपि दूषिते ।
संशयालुः सांशयिके जागरिताऽपि जागरी ॥ ३१

पूजितोऽपचायितोऽपि तुन्दिभोदरिकावपि ।
तुन्दिलः न्युब्जोऽपि कुब्जे खलतोऽप्यैन्द्रलुप्तिके ॥ ३२

पामरोऽपि कच्छुरः अतीसारक्यप्यतिसारकी ।
कण्डूतिरपि खर्जूः स्यात् विस्फोटः पिटके स्मृतः ॥ ३३

कोठो मण्डलकमपि गुदकीलोऽपि चार्शसि ।
मेहः प्रमेहवत् आयुर्वेदिकोऽपि चिकित्सके ॥ ३४

आयुष्मानपि दीर्घायुः कथ्यतेऽथ परीक्षकः ।
स्यादाक्षपाटलिकोऽपि पारिषद्योऽपि सभ्यवत् ॥ ३५

स्युर्नैमित्तिकनैमित्तमौहूर्त्ता गणके लिपौ ।
लिखिताऽपि मषी मेला कुलिके कुलकोऽपि च ॥ ३६

अष्टापदे बुधैः शारिफलकोऽपि निगद्यते ।
मनोजवस्ताततुल्ये प्रभविष्णुरपि क्षमे ॥ ३७

जाङ्घिके जाङ्घाकरोऽपि च अनुगोऽप्यनुगामिनि ।
पर्येषणोपासनापि शुश्रूषायामधीयते ॥ ३८

आतिथ्योऽप्यतिथौ कुल्येऽभिजः गोत्रं तु सन्ततिः ।
महेला योषिता च स्त्री तरुणी युवतीत्यपि ॥ ३९

स्ववासिनी चरिण्टी च चिरिण्टी च चरण्ट्यपि ।
वधूट्यां पत्न्यां करात्ती गेहिनी सहधर्म्मिणी ॥ ४०

सधर्मचारिणी चापि स्नुषायां तु वधूट्यपि ।
प्रेमवत्यपि कान्तायां, पाणिग्राहो विवोढरि ॥ ४१

परिणेतोपयन्ता च यौतके दाय इत्यपि ।
दीधीषूर्दिधिषूः जीवत्पत्नी जीवत्पतिः समे ॥ ४२

तुल्ये अवीरानिर्वीरे श्रवणा-श्रमणे तथा ।
रण्डापि विधवा पुष्पवती स्यात्पुष्पिताऽपि च ॥ ४३

पुष्पे कुसुममप्युक्तं पशुधर्मोऽपि मोहने ।
सहोदरे सगर्भ्योऽपि स्यात् अग्रजवदग्रिमः ॥ ४४

शण्ठः शण्ढः पण्डुरपि क्लीबः माता जनित्र्यपि ।
चिहुरा अपि केशाः स्युः कर्णः शब्दग्रहोऽपि च ॥ ४५

नेत्रं विलोचनमपि सृक्वणी सृक्विणी अपि ।
दाढिका द्राढिकाऽपि स्यात् कपोणिस्तु कफोणिवत् ॥ ४६

कूर्परे कुर्परः सिंहतलः संहतलोऽपि च ।
चलुकोऽपि चलुः मुष्के स्यादाण्डः पेलकोऽपि च ॥ ४७

पत्पादङ्घ्रिश्च चरणे कीकसं हड्डमित्यपि ।
कपालं शकलमपि पृष्ठास्थनि कशारुका ॥ ४८

मज्जायामस्थितेजोऽपि नाडीषु नाडिनाटिकाः ।
शिङ्घाणकोऽपि शिङ्घाणः सृणीका सृणिकाऽपि च ॥ ४९

शान्तः षान्तश्च विड्गूथेऽशुचि वेशोऽपि वेषवत् ।
उत्सादनोच्छादनौ च आप्लवाप्लावौ तथा समौ ॥ ५०

वंशकं कृमिजग्धं चागुरौ स्यात् अथ वाल्हिकम् ।
सङ्कोचं पिशुनं वर्ण्यमसृक्संज्ञं च कुङ्कुमे ॥ ५१

जापके कालानुसार्यम् यावनोऽपि च सिल्हके ।
मकुटोऽपि च कोटीरे चित्रकं च विशेषके ॥ ५२

वतंसोऽप्यवतंसे स्यात् पत्रभङ्ग्यां तु पण्डितैः ।
पत्राद् वल्लरी तत्र मञ्जरी च तथोदिता ॥ ५३

कर्णान्दूरपि कर्णान्दुः परिहार्योऽपि कङ्कणम् ।
किङ्कणी कङ्कणी तुल्ये आच्छादाच्छादने समे ॥ ५४

कूर्पासोऽप्यङ्गिका कक्षापटे कक्षापुटोऽपि च ।
कुथे वर्णपरिस्तोम इत्यखण्डं जगुः परे ॥ ५५

तत्रास्तरणमिति च पल्यङ्कोऽप्यवसक्थिका ।
यमन्यपि प्रतिसीरा स्रस्तरः प्रस्तरोऽपि च ॥ ५६

प्रतिग्रहपतद्ग्राहावपि स्यातां पतद्ग्रहे ।
मुकुरोऽप्याऽऽत्मदर्शे–अथ कशिपुः कसिपुः समौ ॥ ५७

यावकालक्तकौ यावे तुल्ये व्यजनवीजने ।
गिरीयको गिरिकोऽपि बालक्रीडनके मतौ ॥ ५८

गेण्डुकोऽपि गेन्दुकः राट् मूर्द्धावसिक्त इत्यपि ।
भरतः सर्वदमनोऽपि अथ दाशरथावुभौ ॥ ५९

रामचन्द्र–रामभद्रौ हनूमानपि मारुतौ ।
वालौ सुग्रीवाग्रजोऽपि, पार्थे बीभत्सुरित्यपि ॥ ६०

सातवाहनवत् सालवाहनोऽपि प्रकीर्त्तितः ।
परिच्छदे परिजनः परिबर्हणमित्यपि ॥ ६१

मन्त्री बुद्धिसहायोऽपि वेत्री वेत्रधरोऽपि च ।
हेमाध्यक्षे हैरिकोऽपि टङ्कपतिस्तु नैष्किके ॥ ६२

शुद्धान्ताध्यक्ष आन्तर्वेशिमकान्तः पुरिकावपि ।
सहाय–साप्तपदीनौ सख्यौ असुहृदप्यरौ ॥ ६३

नये नीतिरपि स्कन्धावारेऽपि शिबिरो मतः ।
जयन्त्यपि वैजयन्त्यां पटाकाऽपि प्रकीर्त्तिता ॥ ६४

ध्वजः पताकादण्डोऽपि झम्पानं याप्ययानवत् ।
सादी सव्येष्ठोऽपि सूते, कवचितोऽपि वर्मिते ॥ ६५

कवचे दंशनं त्वक्त्रं तनुत्राणमपि स्मृतम् ।
अधियाङ्गं धियाङ्गं चाधिकाङ्गवदुदाहृतम् ॥ ६६

शिरस्कं खोलमप्याहुः स्यान्निषङ्ग्यपि तूणिनि ।
चापे धनूधनुशरासनान्यपि विदुर्बुधाः ॥ ६७

फरकस्फरकौ खेटे क्षुरिका छुरिका छुरी ।
ईल्यां तरवालिकाऽपि परिघः पलिघः समौ ॥ ६८

ऊर्जस्व्यूर्जस्वान् मगधो मङ्खो बोधकरोऽर्थिकः ।
सौखशायनिकः सौखशय्यिकः सौखसुप्तिकः ॥ ६९

रणे संस्फेटसम्फेटौ बले द्रविणमूर्क् तथा ।
अवस्कन्दोऽपि घाट्यां स्यात्, नशनं च पलायने ॥ ७०

चारकोऽपि भवेद् गुप्तौ, तापसे तु तपस्व्यपि ।
विप्रे ब्रह्माऽपि च आग्नीध्राऽऽग्नीध्र्यपि वृषी वृसी ॥ ७१

शसने शमनं च अथ दधिषाय्यं पृषातके ।
अग्निहोत्रिण्यग्न्याहितोऽपि उपवासे समाविमौ ॥ ७२

उपवस्त्रमौपवस्त्रम् उपवीते प्रचक्षते ।
ब्रह्मसूत्रं पवित्रं च, वाल्मीकौ द्वाविमावपि ॥ ७३

मैत्रावरुण्यादिकवी पर्शुरामोऽपि भार्गवे ।
योगीशो याज्ञवल्क्यः दाक्षीपुत्रोऽपि पाणिनौ ॥ ७४

स्फोटायनः स्फौटायनः कात्यो वररुचौ तथा ।
कारेणवः पालकाप्ये चाणक्यश्चणकात्मजे ॥ ७५

वैशेषिके कणादोऽपि जैनोऽनेकान्तवाद्यपि ।
चार्वाके लौकायितिकः कृषिः प्रसृतमित्यपि ॥ ७६

न्यासार्पणे परिदानं वणिक् प्रापणिकः स्मृतः ।
लक्षे च नियुतं पोते स्मृतं प्रवहणं बुधैः ॥ ७७

कर्णोऽप्यरित्रे दुर्गस्य गवेश्वरोऽपि गोमति ।
कर्षके क्षेत्रजीवोऽपि कोटीशो लोष्टभेदनः ॥ ७८

माद्वीकमपि मद्ये अनुतर्षोऽपि चषके स्मृतः ।
कुविन्दे तन्तुवायोऽपि वेमा वेमोऽपि कीर्त्यते ॥ ७९

रजको धावकोऽप्युक्तः पादत्राणं च पादुका ।
तैलिकस्तिलन्तुदोऽपि रथकारोऽपि वर्धकिः ॥ ८०

चित्रकरो लिखकश्च लेप्यकृल्लेपकोऽपि च ।
कुतूहले विनोदोऽपि सौनिकः खट्टिकोऽपि च ॥ ८१

कूटयन्त्रे पाशयन्त्रम् समौ चाण्डालपुक्कसौ ।
इत्थं तृतीयकाण्डस्य शिलोञ्छोऽयं समर्थितः ॥ ८२

रत्नवती भुवि दिवःपृथिव्यावपि रोदसी ।
माणिबन्धं माणिमन्तं सैन्धवे वसुके वसु ॥ ८३

टङ्कनष्टङ्कणः उपावर्तनं चापि नीवृति ।
जङ्गलः स्याज्जाङ्गलोऽपि मालवन्मालको मतः ॥ ८४

पत्तने पट्टनमपि कुण्डिने कुण्डिनापुरम् ।
स्यात्कुण्डिनपुरमपि विपणौ पण्यवीथिका ॥ ८५

सुरुङ्गायां सन्धिरपि गृहे धाममपि स्मृतम् ।
उपकार्योपकर्यापि प्रासादे च प्रसादनः ॥ ८६

शान्तीगृहं शान्तिगृहे प्राङ्गणं त्वङ्गणं मतम् ।
कपाटवत् कवाटोऽपि पक्षद्वारे खटक्किका ॥ ८७

कुशूलवत् कुसूलोऽपि समुद्गे तु पुटो मतः ।
पेटायां स्यात् पेटकोऽपि पेडाऽपि कृतिनां मते ॥ ८८

पवन्यपि समूहन्याम् अयोर्नि मुसलं विदुः ।
कण्डोलके पिटकोऽपि चुल्ल्यामन्तीति कथ्यते ॥ ८९

खजः खजाकोऽपि मथि, विष्कम्भः कुटकोऽस्य तु ।
अगोऽपि पर्वते कौञ्चः क्रौञ्चवद् मन्यते बुधैः ॥ ९०

कक्खट्यपि खटिन्यां स्यात् ताम्रमौदुम्बरं विदुः ।
शातकौम्भमपि स्वर्णे पारदश्चपलोऽपि च ॥ ९१

रसजातं रसाग्र्यं च तुल्ये दार्वीरसोद्भवे ।
माक्षिके वैष्णवोऽपि स्यात् गोपित्तं हरितालवत् ॥ ९२

मनःशिलायां नैपाली शिला च सुधिया मता ।
शृङ्गारमपि सिन्दूरे कुरुविन्दे तु हिङ्गुलुः ॥ ९३

बोलो गोपो रसोऽप्युक्तः रत्नं माणिक्यमित्यपि ।
पद्मरागे शोणरत्नं वैराटो राजपट्टवत् ॥ ९४

नीलमणौ महानीलम् कबन्धमपि वारिणि ।
धूमिका धूममहिषी धूमरी मिहिका समाः ॥ ९५

अकूवारोऽपि जलधौ मकरालय इत्यपि ।
निम्नगायां ह्लादिनी स्यात् जह्नुकन्याऽपि जाह्नवी ॥ ९६

कलिन्दपुत्री कालिन्दी रेवा मेकलकन्यका ।
चन्द्रभागा चन्द्रभागी गोमती गौतमीत्यपि ॥ ९७

चक्राण्यपि पुटभेदाः पङ्के चिक्खल्ल इत्यपि ।
उद्घातनमुद्घाटनं घटीयन्त्रं प्रकीर्त्तितम् ॥ ९८

सरस्तडाकस्तटाकोऽपि अथ तल्लश्च पल्वले ।
आशयाश-शुष्म-बर्हिर्-बर्हिरुत्थ-दमूनसः ॥ ९९

अग्नौ क्षणप्रभा विद्युत् गन्धवाह-सदागती ।
वायौ चरणपोऽपि द्रुः त्वक् त्वचा स्तबके पुनः ॥ १००

गुलुञ्छु लुम्बी माकन्दरसालावपि चूतवत् ।
किङ्किराते कुरुण्टक-कुरुण्डकावपि स्मृतौ ॥ १०१

कर्कन्धूरपि कर्कन्धौ ह्रस्वादिश्चाटरूषकः ।
वज्रे स्नुहि-स्नुहाऽपि स्यात् प्रियालोऽपि पियालवत् ॥ १०२

नार्यङ्गोऽपि नारङ्गे अक्षे बिभेदक इत्यपि ।
भवेत् तमालस्तापिच्छः निर्गुण्ठी सिन्दुवारवत् ॥ १०३

जपा जवा मातुलिङ्गो मातुलुङ्गोऽपि कीर्तितः ।
धत्तूर इव धुत्तूरः वंशस्त्वक्सार इत्यपि ॥ १०४

ह्रीबेरं केश-सलिलपर्यायैः स्मर्यते बुधैः ।
पङ्कजिन्यां कमलिनी सरोजिनी कुमुद्वती ॥ १०५

बिसप्रसूनं कमले कुमुत्कुमुदवन्मतम् ।
शेपालं च जलनीली सातीनोऽपि सतीनवत् ॥ १०६

कुल्मासवत्कुल्माषोऽपि गवेधुका गवीधुका ।
कणिशं कनिशं रिद्धे धान्ये त्वावासितं मतम् ॥ १०७

हालाहलं तथा हालं मुस्तायां मुस्तकोऽपि च ।
कृमिः क्रिमिरपि गण्डूपदः किञ्चुलुकोऽपि च ॥ १०८

शम्बूका अपि शाम्बूकाः वृश्चिको द्रुत इत्यपि ।
भसलो मधुकरोऽली च पिक्को विक्कः करिः करी ॥ १०९

व्यालो व्याडोऽपि उपवाह्योऽप्यौपवाह्ये अपराऽवरा ।
शृङ्खलो निगलोऽन्दूश्च कक्षा कक्ष्यापि वाल्हिके ॥ ११०

वाल्हीकः वल्गा-वागे च खलिनं च खलीनवत् ।
मयुरुष्ट्रे गोपतौ तु शण्ड इत्वर इत्यपि ॥ १११

स्थौरी स्थूर्यपि ककुदे ककुत् कुकुदमित्यपि ।
नैचिकं नैचिकी च स्यात् मलिनी बालगर्भिणी ॥ ११२

पवित्रं गोमये छागे शुभः अथ भषकः शुनिः ।
सरमा देवशुन्यां च यमरथोऽपि सैरिभे ॥ ११३

पारिन्द्र इव पारीन्द्रः शरभेऽष्टापदोऽपि च ।
सृगालवच्छृगालोऽपि प्लवगः प्रवगोऽपि च ॥ ११४

वानायुरपि वातायुः उन्दरोऽपि च मूषके ।
ह्रीकुर्वनबिडालोऽपि गोकर्णोऽपि भुजङ्गमे ॥ ११५

जलव्यालेऽलीगर्दोऽपि शेषः स्यादेककुण्डलः ।
आशीराशी च दंष्ट्रायां निर्मोके निर्लयन्यपि ॥ ११६

विहगे पतत्रिरपि पिच्छं पिञ्छमपि स्मृतम् ।
परपुष्टान्यभृतौ च पिके बर्हिणि बर्हिणः ॥ ११७

वायसे बलिपुष्टोऽपि द्रोणोऽपि द्रोणकाकवत् ।
सारस्यां लक्ष्मणी क्रौञ्च्यां क्रुञ्चा चाषे दिविः किकिः ॥११८

किकिदीविरपि प्रोक्तः टिट्टिभे टीटिभोऽपि च ।
कलविङ्के कुलिङ्कोऽपि दात्यूहे कालकण्ठकः ॥ ११९

दात्योहोऽपि बलाका बकेरुका बिसकण्टिका ।
मेधाव्यपि शुके तैलपायिकायां निशाटनी ॥ १२०

कपोते पारावतोऽपि मत्स्ये मच्छोऽथ तन्तुणे ।
स्मृतो वरुणपाशोऽपि नक्रे शङ्कुमुखोऽपि ॥ १२१

उहारः कूर्मः इत्येष तिर्यक्काण्डः शिलोञ्छितः ।
नारकास्तु नैरयिकाः पाताले तु तलं रसा ॥ १२२

इति पञ्चमकाण्डस्य शिलोञ्छोऽयं समर्थितः ।
जीवोऽपि चेतने जन्तौ प्राणी जन्मोऽपि जन्मनि ॥ १२३

जीवातुर्जीविते अथायुः पुंस्युदन्तोऽपि चायुषि ।
सङ्कल्पे स्याद् विकल्पोऽपि मनोऽनिन्द्रियमप्यथ ॥ १२४

शर्म सौख्यं पीडा बाधः चर्चा चर्चोऽपि कथ्यते ।
विप्रतीसारोऽनुशये अथार्था अपीन्द्रियार्थवत् ॥ १२५

सुशीमस्तु सुषीमोऽपि कक्खटः खक्खटोऽपि च ।
जरठो जरुटः अम्लेऽम्ब्लः रावो रव इव स्मृतः ॥ १२६

निषादो निषधः गर्ज्जो गर्ज्जा मद्रोऽपि मन्द्रवत् ।
आकरो निकरे युग्मे जकुटः अथ कनीयसि ॥ १२७

कनिष्ठं विग्रहः शब्दप्रपञ्चे निखिले पुनः ।
स्यान्निःशेषमनूनं च खण्डलं चापि खण्डवत् ॥ १२८

मलीमसे कल्मषं च निकृष्टे याव्यरेपसी ।
लडहं रमणीयं च रम्ये नित्ये सदातनम् ॥ १२९

शाश्वतिकं च नेदीय इत्यन्तिकतमे स्मृतम् ।
एकाकिन्यवगणोऽपि प्रागप्यादौ प्रकीर्तितम् ॥ १३०

मध्यमे मध्यन्दिनं च निरर्गलमनर्गले ।
बहुरूपपृथग्रूपनानाविधाः पृथग्विधे ॥ १३१

झम्पा झम्पोऽपि अथ छन्ने छादिताऽपिहिते अपि ।
प्रकाशिते प्रादुष्कृतम् अवज्ञायामसूक्षणम् ॥ १३२

बुधैरवमाननावगणने अपि कीर्तिते ।
अन्दोलनमपि प्रेङ्खा अथोदस्तमप्युदञ्चितम् ॥ १३३

भिदा भित् चोदितमपीरिते ऽथाऽङ्गीकृते पुनः ।
कक्षीकृतं स्वीकृतं च छिन्ने छातमपि स्मृतम् ॥ १३४

प्राप्ते विन्नम् विस्मृतं च भवेत् प्रस्मृतमित्यपि ।
अटाटाऽट्या पर्यटनम् आनूपूर्व्यमनुक्रमे ॥ १३५

परीरम्भोऽपि संश्लेषे स्यात् उद्घातोऽप्युपक्रमे ।
जातौ जातमपि स्पर्द्धा सङ्घर्षोऽपि अथ विक्रिया ॥ १३६

विकारो विकृतिश्चापि विलम्भस्तु समर्पणम् ।
दिष्ट्या समुपजोषं सर्वदा सदा सनत् सनात् ॥ १३७

निर्भरे च स्वती हेतौ येन तेन च कीर्तितौ ।
अहो सम्बोधनेऽपि इति षष्ठः काण्डः शिलोञ्छितः ॥ १३८

वैक्रमेऽब्दे त्रिविश्वेन्द्रमिते राधाद्यपक्षतौ ।
ग्रन्थोऽयं ददृभे श्रीमज्जिनदेवमुनीश्वरैः ॥ १३९

पू.आ. श्री बुद्धिसागरसूरिकृतम्

## ॥ लिङ्गानुशासनम् ॥

नाम नपुंसकलिङ्गमिदं लस्तुत्वतनत्तहलोररुयं द्वयच् ।
मं च गृहे जरतं च तमो द्वास्तालुरणार्धनपूर्हृदयं भम् ॥ १

रं च तनोर्दलखामृतदुःखमांसहिमं मुखशमघ विड् भी ।
पुण्य बिलौषधवस्त्रजलास्त्रदारुधनुर्शिखराजिरपिच्छम् ॥ २

हलोदराणां फलपुष्पलोहमण्डनोद्भिजव्यञ्जनजात्यपत्यतो- ।
काणां क्रियाचादिविशेषचार्थाद्
ऐक्ये द्वित्रिपात्रादि च चादितः पथः ॥ ३

ईस्त्येतदादित्व उपक्रमोपज्ञे नाम्नि कन्था यदुशीनरेषु ।
छाया बहूनां च सभा च सङ्घेराजर्थरक्षः सदृशां गृहे तैः ॥ ४

स्वाङ्गे सुहृन्न्यायदलेषु धर्मे मित्रेऽथ सारार्धमु कर्मभावे- ।
ऽणादिः समूहे च कृदच्च भावे भक्तास्पदात्तं यवसं पुरीतत् ॥५

कुहकचिबुके लिङ्गं बीजं ललाटविटे पिटं
कणिशबडिशे शीर्षाक्ष्यण्डं कुटुम्बसमीपदम् ।
सबुसपलिशे रूपं तल्पं कुसीदमृणं गुदं
क्रकचशरणे शिल्पं पृष्ठं कुकुन्दरचामरे ॥ ६

कारणकारकलोष्टकरोटं साहसकुङ्कुमकित्वनिरुक्तम् ।
अक्षरमन्तरमूषरदैवतबाहु च जानु कसेरु च वैरम् ॥ ७

सिध्मेध्मकुर्पोडुपयुग्मगुल्मश्राद्धं गृहस्थूणशरोर्णरत्नम् ।
चिह्नान्तरीपोक्थबिसार्धटाहः पात्रोल्मुल्काभ्रं कुलिशं कलत्रम्॥८

लोकायतालीढभगेङ्गुदाङ्गं स्फारं शफं गह्वरबाष्पशष्पम् ।
शालूकवृन्दं पदराजसूयं सूक्तं प्रियं तुम्बरुवाजपेयम् ॥ ९

कान्तारतीरे शिशिरं करीरं शृङ्गाङ्गदूराररिभाण्डसक्थि ।
क्षूणोष्णपीठं शवगन्धमादने चैकपुण्यात् सुदिनादहं स्यात् ॥१०

किसलयजगच्च भुवनं त्रिविष्टपं कशिपुपञ्जरं कलभम् ।
प्रातिपदिकं कुटीरं यकृदप्यव्यक्तलिङ्गोक्तौ ॥ ११

सङ्ख्येय सङ्ख्यैकपराशताद् यत्
आन्तर्दिगुर्डस्तिसुरानिशाच्छा- ।
याशालसेनानगरार्चिषोऽत्विश् अर्धर्चवाराशनमन्धकारः ॥१२

ओदनचन्दनशृङ्गविधानाः तालखलीनमठासनपानाः ।
स्तेनविमानयुगन्धरसूत्राः गोमयपत्रपवित्रकषायाः ॥ १३

मालकपुस्तकमस्तकनिष्काः मोदकमञ्चकशाटकशूकाः ।
भूषिकतण्डककर्पटशुल्काः क्ष्वेडितपातकभूषणकूटाः ॥ १४

अर्बुदलोहितयौवनवृत्ताः आश्रम संक्रमसङ्गमबिम्बाः ।
देहसुवर्णवसन्तपलालाः कुण्डलतैलतमालमृणालाः ॥ १५

मङ्गलशम्बलशालकरीषाः तोरणतोमरपार्श्वशरावाः ।
कर्षदृढामिषमूलसहस्राः माषबलोपलविक्रमशीलाः ॥ १६

चरकचषकौ खण्डं मुण्डं तडागकरण्डकौ
निकटकपटौ कुण्डं काण्डं विहारनडायुताः ।
पुलिननलिनौ षण्डं दण्डं शरीरतृणव्रणाः
शरकशयनौ गूथं यूथं चषालमलौ तलः ॥ १७

शकलचमसौ मुस्तं बुस्तं शतव्रतदेवताः
चरणकवचौ हस्तं पुस्तं दिनश्च कमण्डलुः ।
समयकवियौ दीपं द्वीपं पिनाकतटव्रजाः
करकशकरौ नेत्रं मूलं रसांशनखव्रणाः ॥ १८

ऐरावतप्रयुतसान्ववतंसजृम्भाः
कर्पासबाणभुवनाङ्कुशकाशकोशाः ।
वल्मीकशाकवरपारविटङ्कतङ्का
अङ्गारताण्डवकिरीटकपालवालाः ॥ १९

पूर्वप्रवालशतमानकबन्धतीर्थाः
गाण्डीवगेहमलयाम्बुजजन्तुसूर्याः ।

कार्षापणाव्ययवितानसपल्लवाप-
राह्णोपवासफलकोत्पलवारबाणाः ॥ २०

शेखरखण्डलदाडिममध्याः कर्कशताडनकुट्टिमराष्ट्राः ।
द्वीपिनवल्कलमण्डपवप्रा अङ्कुशवास्तु च कुञ्जरभावौ ॥ २१

कुतपो विटपो निगडो रजतः ककुदो महिमा वलयो निधनम् ।
तिमिरं मुशलं कमलं कललं समरं कुमुदं कुसुमं पलितम् ॥२२

प्रग्रीवपात्रीवपुसीरपिष्टौ अर्चस्कचक्रौ कुणपोऽप्यरण्यम् ।
अष्टापदः स्थाणु च पुच्छकूर्चौ उद्योगमुद्यानशरौ च नीडः ॥२३

शैलद्यूतौ शौचं कुष्ठं पूलस्थानौ शल्यं कुल्यम् ।
प्रेमप्रेषौ मौनं मानं कर्मस्नेहौ लोमन् ब्रह्मन् ॥ २४

मुष्काकाशौ क्षेमं क्षीरं शङ्खः पद्मः स्यादम्भोजे ।
भूतप्रेते पक्ष्मार्मौ च शङ्कुः पाशः पिण्डः सत्त्वम् ॥ २५

उद्यमपटहप्रतिसरमरककमठसैन्धवो लवणे ।
कण्टकमूलकपटलाः कन्दरमुकुलोऽस्त्री मण्डलं रित्प् नप् ॥२६

पुंस्यत्स्नुदब्धणुघना किकान्तः कूपाब्धिपुष्यासिनदाब्द कोष्ठाः ।
स्वर्वज्रदन्तच्छिदिचक्रिरश्मि धान्यक्रतोः प्राण्यगदैत्यराट्सु ॥२७

वर्णविषर्मासमरुद्ध्वनाक्षौ भेदस्य रात्रोऽषिनृपार्थनाभ्य- ।
प्यास्त्रातसङ्केतपुताश्च पोतः पाण्यङ्घ्रिदृत्यञ्जलिराशिमौलिः ॥२८

वृष्णिगिरी वलिदुन्दुभिनाक्षो रालि जनाभिजनावमतिर्वा ।
नायनहायनसस्तनफेनाः शैवलपुद्गलगोलपटोलाः ॥ २९

कीलकपोलगरास्तरलश्च फालनलौ सृमलावटतूला- ।
पाङ्गमृदङ्गगरुद्धरिदात्मा भूपुरहारकपाल निकाय्याः ॥ ३०

ग्रन्थिः पिचण्डः कलिकुक्षिकेलि-
कल्लोलकालाः विभवार्थरैस्र्वाः।
गर्त्तोत्तरासङ्गच्छदाश्च मर्मन्
आच्छादने वेम मकरन्दकुन्दौ ॥ ३१

उच्चारवेधः प्रसवाश्च संवत् नाडीव्रणो यानयुगश्चषालः ।
श्लेष्मोष्मवेमाश्म च पाप्मयक्ष्माः लाजासुदारा- गृहवल्वजाश्च ।
वास्त्रा दशार्शकुचवर्ध्रमेढ्रौ पुंस्तस्त्रियां तिस्त्रघनप् न नस्त्री ॥३२

लिङ्गं स्त्रियां योनिमतां तथोद्यान् शिष्टे द्रुनौ दीधितिलिद्दरद्धल्।
जात्याजिभाः पूरुदुकाकुरज्जुकुस्वायुछर्दिस्तनुबन्धुविट्याः ।
शरज्जलौकः सुमनोऽप्सराः द्यौः वर्षाः समाऽऽपः सिकता गाथाः॥

सत्यादि योन्यादिमरीचिपाटलि-
श्रोण्यूर्मितुट्यो मषियष्टिशाल्मलि ।
कर्कन्धुमण्यस्तिथिबस्ति मुष्टयो-
ऽरणीषुधीष्वस्तरणिश्च कम्बलः ॥ ३४

शल्लक मल्लक वृश्चिकशाटाः बाहुवराटकपुत्रसृपाटाः ।
कन्दरजाटलि दंशकलम्बाः मन्वशनिकुटस्वाति किटाश्च ।
रेणुमुनिर्पिटकोऽहि कुटिश्च शिल्पचतुर्द्विपदाभ्यभिधानम् ॥३५
(गाथा)

मृर्त्युघटः कण्डुविभीतकौ तटः
भल्लातकश्चामलको हरीतकः ।

पात्रं कपालोदरभण्डलौ पुरः
वटोऽवटः स्यात् कलशः पटो मठः ।
पुरो विषाणो नखरोऽपि शृङ्खलः
द्रोणोऽपि वल्लूर कटस्प्रियपङ्गराच् ॥ (षट्पदी) ३६

शल्वाच्यवन्नामगुणश्च संख्या प्रायस्तथा सिध्यति यस्तदर्थे ।
प्राप्तालमापन्नवदादिकेत्यर्थान्तद्विगौ चार्थपितोः परस्य ॥ ३७

पू.आ. श्री अमरचन्द्रसूरिविरचितः

## ॥ स्यादिशब्दसमुच्चयः ॥

श्रीसारदां हृदि ध्यात्वा स्यादिशब्दसमुच्चयम् ।
करोत्यमरचन्द्राऽऽख्यो यतिः श्वेताम्बराग्रणीः ॥ १

शब्दाः पुंलिङ्गा स्त्रीलिङ्गाः स्युर्नपुंसकलिङ्गकाः ।
स्त्रीपुंलिङ्गकाः पुंक्लीबलिङ्गाः स्त्रीक्लीबलिङ्गकाः ॥ २

त्रिलिङ्गका अलिङ्गाश्च वाच्यलिङ्गा अपि क्रमात् ।
नव प्रकाराः शब्दानां लिङ्गभेदो भवत्ययम् ॥ ३

स्वरान्ता व्यञ्जनान्ताश्च सर्वनामगणोदिताः ।
सङ्ख्यासमाश्रिताः शब्दा ज्ञेयाः प्रज्ञावता क्रमात् ॥ ४

अकारान्ताः स्मृताः पुंसि देव-मुख्याः समक्रियाः ।
मास-दन्त-पाद-यूषाः शसादौ भेदभाजिनः ॥ ५

नपुंसके स्मृतास्तुल्यक्रियाः कुण्डा-कुलाऽऽदयः ।
हृदयोदकाऽऽसनानां शसादावन्तरं पुनः ॥ ६

शुक्ल-कृष्णारुणाद्यास्तु वाच्यलिङ्गाः प्रकीर्त्तिताः ।
आकारान्ताश्च पुंलिङ्गा हाहा-प्रभृतयः समाः ॥ ७

आकारान्ताः स्त्रियां श्रद्धा-शाला-मालाऽऽदयः समाः ।
जरा-निशा-नासिकाऽम्बार्थानां स्यादन्तरं पुनः ॥ ८

आकारान्ता वाच्यलिङ्गाः सोमपा-प्रमुखाः समाः ।
पुंसि तुल्या इकारान्ता अग्नि-विध्यादयो मताः ॥ ९

विशेषः सखि-पत्योस्तु पन्थि-मन्थि-ऋभुक्षिषु ।
इकारान्ताः स्त्रियां बुद्धि-मुख्या धूलि-मुखाः समाः ॥ १०

वारि-प्रभृतयस्तुल्या इकारान्ता नपुंसके ।
अस्थि-दधि-सक्थ्यक्ष्णां तु विज्ञेयं पुनरन्तरम् ॥ ११

वाच्यलिङ्गाः शुचिप्रायाः सुबुद्ध्याद्याः सदृक्क्रियाः ।
सुरभिर्भूरि-सुमति-दीर्घाङ्गुलि-मुखा अपि ॥ १२

ईकारान्तास्तु पुंलिङ्गास्तुल्या वातप्रमी-मुखाः ।
ईकारन्ताः स्त्रियां ज्ञेया नदी - मही मुखाः समाः ।
लक्ष्मी-श्री - ह्री-धीमुख्यानां स्त्रीशब्दस्य तथाऽन्तरम् ॥१३

ईकारान्ता वाच्यलिङ्गा अतिलक्ष्मी-मुखाः समाः ।
पृथुश्री-प्रमुखा भिन्नाः सेनान्युन्नी-मुखाः पृथक् ॥ १४

भिन्ना यवक्री-नी-प्रासभी-महानी-मुखास्तथा ।
शम्भ्वाद्याः पुंस्युकारान्ताः समाः कोष्टु-विवर्ज्जिताः ॥ १५

धेनु-मुख्या उकारान्ताः स्त्रीलिङ्गाः सदृशक्रियाः ।
जतु-प्राया उकारान्ताः समानाः स्यर्नपुंसके ॥ १६

उकारान्ता वाच्यलिङ्गाः पटु-लघ्वादयः समाः ।
ऊकारान्ताः पुंसि हूहू नग्नहू-प्रमुखाः समाः ॥ १७

स्वयंभू-प्रतिभू- प्रायाः सदृशाः खलपूः पृथक् ।
एभ्यो वर्षाभू-पुनर्भू-शब्दयोरन्तरं मतम् ॥ १८

स्त्रियामूदन्ता वध्वाद्याः समा भ्रूर्भूश्च भेदभाक् ।
समा वाच्यलिङ्गा अतिचमू-प्राप्तवधू-मुखाः ॥ १९

धातूदन्ता वाच्यलिङ्गाः सकृल्लू-प्रमुखाः समाः ।
भिन्नाः कटप्रू-लू-प्राप्तलू-महाप्रमुखाः समाः ॥ २०

ऋकारान्ताः पितृ भ्रातृ-मुखाः पुंसि समक्रियाः ।
नृशब्दस्यान्तरं प्रोक्तं षष्ठ्यन्तवचने सति ॥ २१

स्त्रियां मातृ-मुखाः प्रोक्ता ऋकारान्ताः समक्रियाः ।
स्वस्रादीनां पितृष्वसृ-मातृष्वस्रोस्तथाऽन्तरम् ॥ २२

वाच्यलिङ्गा ऋकारान्ताः कर्तृ-प्रभृतयः समाः ।
ऋकारान्ताः पितृ-मुख्याः पुंसि तुल्यक्रियाः स्मृताः ॥ २३

स्त्रियां पितृ-मुखास्तुल्याः क्लीबे सुपितृवत् पुनः ।
ऌकारान्ता वाच्यलिङ्गाः प्रियक्ऌ-प्रमुखाः समाः ॥ २४

ऌकारान्ता वाच्यलिङ्गाः प्रियक्ऌ-प्रमुखास्तया ।
एकारान्ताः से-परमे-मुख्याऽतुल्यक्रिया मताः ॥ २५

ऐकारान्तो रैः पुंनार्योरोकारान्तस्तथैव गोः ।
औकारान्तो ग्लौः पुल्लिङ्गे नौः स्त्रीलिङ्गे समक्रियौ ॥ २६

इति स्यादिशब्दसमुच्चये स्वरान्तशब्दोल्लासः ॥ १

वाच्यलिङ्गाः कवर्गान्ताः स्वस्वोक्तप्रक्रियाजुषः ।
पुंसि स्त्रियां च सदृशा भेदभाजो नपुंसके ॥ २७

चन्ताः पुंस्यम्बुमुच् प्रायाः स्त्रियां वाच्-प्रमुखाः समाः ।
वाच्यलिङ्गाः स्निग्धत्वच्-मूलवृश्च्-सुकुञ्च्-मुखा मताः ॥२८

प्राञ्चपाञ्च्-प्रमुखास्तुल्याः प्रत्यञ्च्-मध्वञ्च्-मुखाः समा
उदञ्च् भिन्नः पृथग् तिर्यञ्च्-
सध्यञ्च् सम्यञ्च् समाविमौ ॥ २९

विष्वद्र्यञ्च्-देवद्र्यञ्चौ च सर्वद्र्यञ्च् प्रमुखास्तथा ।
अदमुयञ्चमुद्र्यञ्चमुमुयञ्चदद्र्यञ्चपि ॥ ३०

गोञ्च् पृथग् दृषदञ्च्-मुख्या भिन्नाः प्राञ्चादयोऽर्चने ।
वाच्यलिङ्गाः समाश्छन्ताः पुंसि जन्ता वणिज्-मुखाः ॥ ३१

राज्-सम्राजो समावृत्विज् भिन्ना रुज्-स्रज्-मुखाः स्त्रियाम् ।
क्लीबे त्वसृज् मुखा वाच्यलिङ्गा देवेज्-मुखाः समाः ॥ ३२

धानाभ्रस्ज् भेदभाक् तृष्णज्-युज्-बहूर्ज्ज्-प्रमुखाः पृथग् ।
झन्ता ञन्ताः टवर्गान्ता वाच्यलिङ्गाः प्रकल्पिताः ॥ ३३

तन्ताः पुंसि मरुन्मुख्याः स्त्रियां विद्युन्मुखाः समाः ।
क्लीबे जगन्मुखास्तत्र यकृतः शकृतोऽन्तरम् ॥ ३४

वाच्यलिङ्गा महन्त्-मुख्याः शन्तृङन्ताश्च सान्तराः ।
करिष्यन्त्-खजित्-कृतवन्त्-यावन्त्-इयन्त्-मुखास्तथा ॥३५

थन्ता मता वाच्यलिङ्गास्तक्रमथ्-प्रमुखाः समाः ।
दन्ताः क्रव्याद्-मुखाः पुंसि स्त्रियां तुल्या दृषद्-मुखाः ॥३६

वाच्यलिङ्गास्तत्त्वविदाद्या व्याघ्रपाद्-मुखा अपि ।
धन्ताः स्त्रियां समिध्-मुख्या वाच्यलिङ्गास्तु संमताः ॥ ३७

मृगाविध्-मर्माविध्-विक्रुध्-प्रमुखा ज्ञानबुध् तथा ।
नन्ताः पुंस्यात्मनो मुख्या राजन्-मुख्याश्च सान्तराः ॥ ३८

भेदः श्व-युव-मघोनामिन्-हन्-पूषार्यमार्व्वताम् ।
विशेषः प्रतिदीव्नोऽस्ति स्त्रियां सीमन्-मुखाः समाः ॥ ३९

क्लीबे सामन्-मुखास्तुल्याः पर्व्वजन्मादयः पृथक् ।
अह्नो भेदो वाच्यलिङ्गा बहुराजन्-मुखा मताः ॥ ४०

पन्तोऽप् स्त्रियां वाच्यलिङ्गाः शुच्यप्-मण्डपलिप्-मुखाः ।
फन्ता बन्ता वाच्यलिङ्गा अरितुफ्-पुत्रचुम्ब्-मुखाः ॥ ४१

भन्ताः स्त्रियां ककुभ्-मुख्या वाच्यलिङ्गा विदभ्-मुखाः ।
मन्ता यन्ता वाच्यलिङ्गाः प्राप्तशमव्ययादयः ॥ ४२

रन्ताः स्त्रियां गिर्-धुर् - मुख्या वाच्यलिङ्गाः सुगिर् - मुखाः।
तथा लन्ता विमल् तुल्या वन्ता दिव्-प्रमुखाः स्त्रियाम् ॥४३

वाच्यलिङ्गाः सुदिव्-प्रायाः शन्ता विश् पुंसि तु स्त्रियाम् ।
दिश्-समा वाच्यलिङ्गा नश्-जीवनश्-दृष्टदिश्-समाः ॥ ४४

षन्ता द्विषादयः पुंसि प्रावृष्-प्रभृतयः स्त्रियाम् ।
वाच्यलिङ्गाः सुवर्णमुष् मुख्याः सजुष्-दधृष् तथा ॥ ४५

सन्ता वेधो मुखाः पुंसि दोस्-पुंसोन्तरं मतम् ।
उशनः-पुरुदंशोऽनेहसां भेदः स्त्रियां पुनः ॥ ४६

सुमनोऽप्सरो-भास्-मुख्याः क्लीबे सन्ता महो-मुखाः ।
इसन्ता सर्प्पिः-प्रमुखा उसन्ताश्च वपुर्निभाः ॥ ४७

वाच्यलिङ्गा बहुविधास्तस्थिवस्-प्रमुखा मताः ।
हन्ताः पुंलिङ्गास्तुरासाह्-पृष्ठवाह्-सदृशा मताः ॥ ४८

स्त्रियामुपानह्-सदृशा वाच्यलिङ्गा मुहादयः ।
क्षन्ता वाच्यलिङ्गाः काष्ठतक्ष्-गोरक्ष्-प्रमुखा मताः ॥ ४९

इति स्यादिशब्दसमुच्चये व्यञ्जनान्तशब्दोल्लासो द्वितीयः ॥ २

सर्वनामगणेऽन्यादिर्डतमप्रत्ययावधिः ।
पूर्व्वादिरन्तरान्तस्तु त्यदादिर्व्यवधिः पुनः ॥ ५०

युष्मदस्मद्-भवन्तश्च स्वस्वोक्तप्रक्रियास्पृशः ।
पूर्व्वादियुक्तस्त्वन्यादिर्गणः किञ्चित् पृथक्क्रियः ॥ ५१

इति स्यादिशब्दसमुच्चये सर्वनामगणोल्लासस्तृतीयः ॥ ३

एकाद्याः सङ्ख्याशब्दाः स्युः स्वस्वोक्तप्रक्रियास्पृशः ।
पुंस्त्रीलिङ्गाः फणरथोर्म्मीषुध्यूरु-मुखा मताः ॥ ५२

पुंनपुंसकलिङ्गास्तु व्यलीक-पुस्तकाऽऽदयः ।
स्त्रीक्लीबलिङ्गा नासीर-मृगव्य-नगराऽऽदयः ॥ ५३

स्वतस्त्रिलिङ्गाः कन्दल-मृणाल-शकटाऽऽदयः ।
अलिङ्गका युष्मदस्मद्-ष्णान्ता सङ्ख्या डतिस्तथा ॥ ५४

इति श्रीमद्वायटगच्छीयश्रीजिनदत्तसूरिशिष्यपण्डित-
श्रीमदमरचन्द्रानुस्मृते स्यादिशब्दसमुच्चये
सङ्ख्याशब्दोल्लासचतुर्थः ॥ ४

पू. उपा. श्री मतिकीर्तिविजयविरचिता

# ॥ गुणकित्त्व-षोडशिका ॥

सर्वत्रेको गुणः प्रोक्तो, विद्धिः सार्व(र्वार्द्ध)धातुके ।
उपधाया लघोरेव, पुगन्तस्याऽलघोरपि ॥ १

तथाऽन्त्यस्याऽञ्णिति प्रोक्तो-ऽविचिण्णल्ङित्सु जागरेः ।
अभ्यस्तस्योपधाया नो, अचि पित्सार्वधातुके ॥ २

भूसुवोस्तिङ्युतो वृद्धि-र्लुकि हलि सार्वधातुके ।
विभाषोर्णोर्गुणोऽपृक्ते, न क्ङिति क्वचनाऽपि हि ॥ ३

विहायैतान् वक्ष्यमाणान्, जुसीगन्तं मिदि शिति ।
तथा ङ्यृदृशं लिटि च, संयोगादिमृतं तथा ॥ ४

ऋच्छत्यृतश्च याद्येषु, लिङ्-यङ्यक्षुपरेषु च ।
संयोगादिं तथाऽर्त्ति च, दिधीवेव्योरिटश्च न ॥ ५

सर्वत्र न धातुलोपे, स भवेदार्धधातुके ।
परस्मैपदे सिचीगन्ते, वृद्धिर्भवति बाधिका ॥ ६

जागृणिश्वीन् विहायैवा-ऽनिटां चैवाऽविशेषतः ।
बाधते वृद्धिरत्यन्तं, मृजेर्वृद्धिर्गुणाद् भवेत् ॥ ७

तथैव शीङः सर्वत्र, गुणः स्यात् सार्वधातुके ।
सिच् ऊ(च्यू)र्णोतेर्विकल्पेन, गुणस्य विषयस्त्वयम् ॥ ८

कुटादिभ्योऽञ्णितः सर्वे, गाङ्श्चाऽपि ङितः स्मृताः ।
विज इड् विभाषोर्णोते-स्तथाऽपित् सार्वधातुकम् ॥ ९

लिङ् वाऽसंयोगतः कित् स्यात्, तथेधेर्भवतेः परः ।
क्त्वा मृडादिगणात् सेट्को, रुदादिभ्यः सना युतः ॥ १०

इगन्तादिगुपान्त्याच्च, झलादिसन् किदिष्यते ।
झलादी लिङ्सिचावात्म-नेपदेष्विगुपान्त्यतः ॥ ११

ऋवर्णान्ताद् वा गमश्च, हनः सिच् गन्धने यमः ।
दक्षो दाक्षीसुतश्चख्यौ, वा चोपात् पाणिपीडने ॥ १२

स्थाघ्वोरिच्च विभाषा क्त्वा, थफान्तान्नोपधाच्च सेट् ।
वञ्चिलुञ्चिऋतश्चाऽपि, काश्यपस्य तृषेर्मृषेः ॥ १३

कृशो हलादेर्व्यपधा-द्रलन्तात् संस्तथैव च ।
अतिदेश-क्ङितः प्रोक्ताः सुबोधा उपदेशिकाः ॥ १४

न क्त्वा सेट्कस्तथा निष्ठा, धृष्शीङ्भ्यां स्विन्मिदिक्ष्विदः ।
मृषस्तितिक्षावचनात्, तथा भावादिकर्मणोः ॥ १५

उदुपान्त्याद् विकल्पेन, तथा पूङः कितौ मुनेः ।
श्रीमद्गुरोः प्रसादेन प्रापञ्चि मतिकीर्तिना ॥ १६

पू.आ.श्री.सिद्धसेनदिवाकरविरचिता

# ॥ सिद्धमातृका ॥

अर्हं विभुर्विश्वशिरोवतंस - प्रायान्तरज्योतिरनाद्यनन्तः ।
सिद्धाक्षरब्रह्मवितानगर्भो विमुक्तचित्तैरपि चिन्तनीयः ॥ १
(उपजाति)

अर्हं समग्रवर्णानां धुरि चान्ते च लीनवान् ।
ज्ञातो नतैः परब्रह्मनिष्णातैर्नरशेखरः ॥ (अनुष्टुप्) २

अर्हं मध्यस्थतालीनसकलाक्षरनायकः ।
तमोघ्नैकशिरोरत्न-माम्नातो बालकैरपि ॥ (अनुष्टुप्) ३

अर्हं विधाता परमः पुमानर्हं महेश्वरोऽर्हं गुणसम्पदा सदा ।
त्रैगुण्यमुक्तः क्रमतो जिनोऽप्यर्हं
चराचरेऽर्हं खलु नामधामभिः ॥ (उपजाति) ४

ॐमित्येकं ध्येयमध्यात्मिनां यो मायाबीजे यत्प्रतिच्छायमम्भः।
सोऽहं हंसः सात्त्विका लिप्सवो मे
न ह्रीमन्तः श्वा(स्वा)त्महानिः क्व तेषाम् ? ॥ (शालिनी) ५

सोऽहं हंसः कश्चिदाकाशदेवो मायास्थल्यां यन्मरीचिप्रपञ्चः ।
अग्रे तन्वन्नुत्तरङ्गं भवाब्धिं स्वान्तभ्रान्तिं हन्त दत्ते पशूनाम् ॥६
(शालिनी)

सोऽहं हंसः सर्वलोकैकचक्षुः पङ्कातङ्कस्याऽन्तको यत्प्रकाशः ।
सच्चक्राणां ध्वस्तदोषान्धकारः कान्तासङ्गं नित्यरङ्गं चकार ॥७
(शालिनी)

नैकात्मतैकात्म्यमनात्मतेतिधीस्त्रिमार्गगा मद्व्यवहारशैलतः ।
निर्याति विश्वत्रयवन्द्यवैभवा
सन्निश्चयाब्धौ व्रजति स्वयं लयम् ॥ (उपजाति) ८

नैकात्मतां केवलितामनीशतां प्रकाशमानेन परां चराचरे ।
स्याद्वादिना हन्त मयैव केनचित्,
कृतः प्रसादो निखिलासु दृष्टिसु ॥ (उपजाति) ९

यावान् भावो यो भवार्थं स तावान्,
सर्वोऽपि स्यान्मुक्तये मत्प्रसादः ।
यन्मेघाम्भः क्षीयते धन्वभूमौ
मुक्तीभूतं पश्य तच्छुक्तिलाभात् ॥ (शालिनी) १०

अर्हद्विष्णुशिवस्वयम्भुसुगतज्योतिःश्व(स्व)भावाम्बर-
ब्रह्मानन्दचिदात्मनः सदसदूर्द्ध्वाधःस्थदूर्वाङ्कुरैः ।
द्वैताद्वैतिभिरुद्गतैर्धृतनवाकाराङ्गजन्मान्तरं
सङ्ख्याबीजकमादिमं भगवतीं शक्तिं भलीति स्तुमः ॥ ११
(शार्दूलविक्रीडित)

द्वयात्मभावाङ्कुरनिर्मिताकृते-
र्जीवान् दिशन्ती नवधा भवस्थितान् ।
जनि-क्षय-स्थेमगुणत्रयीमयी
सा शक्तिरेका परमात्मनोऽर्हतः ॥ (उपजाति) १२

भलते जनाय नवतत्त्वसुधां,
भलतेऽस्तितां नवविधाङ्गभृताम् ।
नवपापकारणगणं भलते,
तदसौ भलीति भणिता गुणिभिः ॥ (प्रतिमाक्षरा) १३

फणीन्द्रबीजाङ्कुरविद्युदाकृते
र्या भूर्भुवः स्वर्दधतीव लक्ष्यते ।
शक्तिः परा कुण्डलिनी भलीति सा,
लेलिख्यतेऽभैर्धुरि शब्दब्रह्मणः ॥ (उपजाति) १४

भले भले कुण्डलिनि ! श्रियं तवा-
द्भुतां महाभूतगुणात्मिकां तदा ।
जाड्यान्धकारं भलसे यदा तदा
संवित्तिवित्तं भलसे सनातनम् ॥ १५

लोकेशकेशवशिवेश्वरशक्तिबुद्धी-
लक्ष्म्या(क्ष्म्य)र्हदात्मपरब्रह्मपदानि यस्य ।
तज्ज्ञा जगुः स्तुतिवचांसि तदेतदीडे,
शून्यं गुणत्रयविकारनिकारशून्यम् ॥ (वसन्ततिलका) १६

अन्तरङ्गबहिरङ्गतरङ्गैः शून्यतामुपगताय नितान्तम् ।
शुद्धशाश्वतशिवाय नमोऽस्तु क्षीणपुण्यवृजिनाय जिनाय ॥१७
(स्वागता)

स्पर्श-रस-गन्ध-वर्ण्णा-कृति-
पू(पौ)र्वापर्य्य-लिङ्ग-समयाद्यैः ।
नामस्थान-ध्यान-ध्येयैर्यः सर्वथा मुक्तः ॥ १८

आद्यन्तशून्यो जगदेकजीवनो य
आदिसङ्ख्यः सकलोऽविशत्कलाः ।
नवाऽष्ट सप्ताऽथ षडेव पञ्च वा
चतुस्त्रिकद्व्येकमितास्ततः परम् ॥ (उपजाति) १९

शान्तः कृतान्तस्त्वमहन्तयोज्झितः
शून्यात्मतां काञ्चन यो दधौ पराम् ॥
अहं स रूढ्या परमेश्वरो जने
मध्यस्थतालीनसमग्रवर्णराट् ॥ (उपजाति) २०

द्वन्द्वैर्भृशं शून्यवदेव शून्यः, शून्योऽणुमात्रं न निरञ्जनानाम् ।
शून्यैकभावे फलशून्यबुद्धे !
परं लयं संश्रित ऐक्यसिद्ध्यै ॥ (उपजाति) २१

द्वयो रेखे नित्ये महिमविषये शक्तिशिवयो-
र्द्वयो रेखे तथ्ये भुवनजनने पुण्यतमसोः ।
उभे रेखाप्राप्ते शिववितरणे ज्ञानतपसी
उभौ रागद्वेषौ किल कलितरेखौ भवपथे ॥ (शिखरिणी) २२

उभौ रेखायोग्यौ श्रितसहजवैराश्रवभरौ
जने कर्मात्मानौ कलितविधिदैवादिबिरुदौ ।
उभावेव ह्येतद्विरहकरणोपायनिपुणौ
जिनस्तावद् रेखां भजति समयोऽन्यस्तदुदितः ॥ २३
(शिखरिणी)

यदि वा-द्वन्द्वेषु च्छायातप-सुखदुःख-दिनक्षि(क्ष)पा-शिवभवेषु।
अरिमित्र-पुण्यपाप-प्रमोदशुगु-त्पत्तिमरणेषु ॥ २४

तेजस्तम-उदयक्षय-जागरनिद्रा-परात्ममुख्येषु ।
यच्चित्तं समरेखं तेषां रेखे इहाऽमुत्र ॥ (यु.) २५

अथवा

जगदेकशरण्यस्य रेखे स्याद्वादभूभुजः ।
निश्चय-व्यवहाराख्ये भुजे इव विराजतः ॥ (अनुष्टुप्) २६

नित्यानित्यात्मकान् भावान् स्थापयन्त्यौ चराचरे ।
अनेकान्तगृहद्वारि रेखे जैत्रध्वजोपमे ॥ (अनुष्टुप्) २७

शब्दब्रह्मशरीरेऽनेकान्तात्माऽस्ति साक्षिणी रूपे ।
हिमकरदिनकरनाड्या-विव रेखे निर्भरे स्फुरतः ॥ २८

युगादिदेवस्य शिवस्य नन्दिनी
ब्राह्मीति विश्वप्रथिता सरस्वती ।
सौन्दर्यसीमा कमला च सुन्दरी-
त्यवाप रेखामिषतोऽर्हणामिह ॥ (उपजाति) २९

नाभिप्रिया कुण्डलिनी भवात् शिवात्
जाते सुरेखे सुसमे सुसङ्गते ।
एकान्तमानोद्धतबुद्धये स्थिरास्थिरप्रमाणप्रगुणे इमे स्तुमः ॥३०
(उपजाति)

(अनुष्टुप्)

संसारे श्री-सरस्वत्यो रेखा प्राप्ता पवित्रिता ।
यत्त्यक्तमङ्गिनं सर्व-तीर्थांसि पुनन्ति न ॥ ३१

द्वाविमौ पुरुषौ लोके लब्धरेखौ मतौ मम ।
अर्थितो यः करोत्येव यश्च नार्थयते परम् ॥ ३२

गङ्गासिन्धू च पाविन्यौ द्वयो रेखे सतां मते ।
कार्यं विनोपकारी यो यश्च नापह्नुते कृतम् ॥ ३३

स्वर्गापवर्गयोर्मार्गौ द्वावेव प्राञ्जलौ स्मृतौ ।
श्राद्धधर्म-यतिधर्मौ प्राप्तरेखौ चराचरे ॥ ३४

अवश्यं नश्वरं सर्वं देहगेहधनादिकम् ।
ध्रुवत्वे धर्म-यशसोरेव रेखे निरीक्षिते ॥ ३५

स्वात्मा देवः कर्म दैवं रेखे सूनृतवर्त्मनः ।
स्वातन्त्र्यं सर्वसन्तोषो रेखे ऐश्वर्यसम्पदः ॥ ३६

मन्ये सुखे च दुःखे च परां रेखां श्रिता बु(ब)भौ ।
स्निग्धैर्मुग्धैर्विदग्धैर्यः संयोगो विरहश्च यः ॥ ३७

पीयूष-कालकूटे च द्वे रेखे मुनिभिर्मते ।
एका सद्दर्शनप्राप्तिः परा तदवधीरणा ॥ ३८

द्वौ रसेन्द्रौ द्वयोरेव रेखाप्राप्तौ बभूवतुः ।
शृङ्गारो गिरिजाकान्ते शान्तः पारा(र)गते विभौ ॥ ३९

धर्मशास्त्रोपनिषदा-मिदं रेखाद्वयं ध्रुवम् ।
परोपकारः पुण्याय पापाय परपीडनम् ॥ ४०

रेखाप्राप्तावुभावेव मन्ये सुखिषु मानिषु ।
सम्पन्नाखिलकामो वा यो वाऽस्ताखिलकामनः ॥ ४१

एकोऽर्हन् बोधिदो देवः परः स्वात्मा गुरूदितः ।
इदं रेखाद्वयं स्थास्नुः सिद्धादेशश्चराचरे ॥ ४२

अलं वा विस्तरेण । प्रस्तुतमभिधीयते-
पुरस्कृतनिरञ्जनाऽहमिति रूढितो याऽर्चिता
प्रमाणयुगमग्रतो जगति जातरेखं श्रिता ।

धृतान्तरखिलाक्षरा जयति कापि शक्ति परा
गुणत्रितययोगिनीं सुगुणलक्ष(क्षि)तामक्षताम् ॥ (पृथ्वी) ४३

हेतुः शम्भोः शक्तिः शम्भुर्बिन्दुः पुरःस्थिते रेखे ।
प्रत्यक्षाऽ[प्र]त्यक्षपदार्थबोधनिपुणे प्रमाणे द्वे ॥ ४४

ॐमादिर्लक्षान्ता वर्णाली दिक्कुमारिकासङ्घः ।
इति सिद्धमातृकायै नमो नमो विश्ववन्द्यायै ॥ ४५

यो जन्मबीजं शिवशक्तिशब्द-ब्रह्मात्मचैतन्यजगद्गुणानाम् ।
षड्दर्शनान्तर्लयतारकाभां तां मातृकां त्रैधमहं स्मरामि ॥ ४६
(इन्द्रवज्रा)

अचलाऽनलाऽनिलोदक-खमूर्त्तिरध ऊर्द्ध्वमध्यलोकमयः ।
अर्हन्मुखमुख्याक्षर-सिद्धः प्रणवोऽवतु जगन्ति ॥ ४७

अथवा-

अधमोत्तमध्यमादिमा-क्षरतः सन्धिप्रयोगसंहतात् ।
उदितं प्रणवं जगन्मयं जगदुर्जागरयोगसम्पदः ॥ ४८

आक्रम्य कर्माण्यधमोत्तमानि केनापि माध्यस्थ्यमहो महिम्ना ।
जज्ञे महानन्दमयो मुनिर्यो नमो नमोऽस्तु प्रणवाय तस्मै ॥४९
(उपजाति)

मध्यस्थतां मध्यमलोकपालः, पापेषु पुण्येषु परां प्रपद्य ।
ययावनन्तामधऊर्द्ध्वलोका-वतंसलक्ष्मीं जिन एक एव ॥५०
(उपजाति)

अतो ब्रूमहे–

ॐ नमः सकलपारगामिने सिद्धपञ्चपरमेष्ठिरूपिणे ।
अत्रिलिङ्गमहसे परात्मने ज्ञानदर्शनचरित्रबीजिने ॥ ५१

ॐ नमः परमवेधसेऽर्हते भास्वते पुरहृतेऽमृतद्युते ।
अच्युताय सुगताय तायिने भूर्भुवःस्वरपवर्गदायिने ॥ ५२

ॐ नमस्त्रिपुरुषार्चितार्चिषे सर्वदोषरहितात्मनेऽर्हते ।
व्यापकत्रिगुणतीतमूर्त्तये लोका(क)पौरुषशिरोमणिश्रिये ॥५३

ॐ नमो विरजसे स्वयम्भुवे विष्णवे दलितदम्भकेलये ।
शम्भवेऽस्ततमसे भवस्थितिध्वंसकारणगुणात्मनेऽर्हते ॥ ५४

नमोऽस्तु देवाय चिदात्मनेऽर्हते,
नमोऽस्तु शीलाङ्गधराय साधवे ।
नमोऽस्तु धर्माय दयास्वरूपिणे,
नमोऽस्तु रत्नत्रयभक्तिशालिने ॥ (वंशस्थ) ५५

सिद्धं त्रिलोकी सुखवैभवं ध्रुवं,
सिद्धं प्रसिद्धं तदहो ! गुणाष्टकम् ।
सिद्धं परब्रह्म तदक्षरं सता–
मनादिसिद्धं श्रयतामिहाऽक्षरम् ॥ (उपजाति) ५६

तथाहि–

षोडशच्छदजुषि स्वरमालां, नाभिकन्दकमले विचरन्तीम् ।
चिन्तयेदथ सकर्णिकपद्मे, द्वादशद्वयदले हृदि वर्णान् ॥ ५७
(स्वागता)

अष्टपत्रयुजि वक्त्रसरोजे,....................... ।
संस्मरन्निति जिताक्षकषायो
मातृकां सकलविन्मनुजः स्यात् ॥ (स्वागता) ५८

सुधियां चिन्मयधाम्नो जननात् परिपालनात् विशोधनतः ।
श्रीसिद्धमातृकैवं कमलश्रीर्जयति मातेव ॥ ५९

अनादिनिधनं वेद-सिद्धान्तादि परम्परम् ।
पौरुषेयं परं ज्योति-र्मातृकाख्यमुपास्महे ॥ (अनुष्टुप्) ६०

पुमर्थशास्त्राण्यखिलानि येभ्यो,
बीजोत्करेभ्योऽङ्कुरवद् विकाशम् ।
गृह्णन्ति सद्बुद्धिसुधोक्षितानि,
तेभ्योऽक्षरेभ्यः प्रणतोऽस्मि बाढम् ॥ (उपजाति) ६१

सिद्धान्त-तर्क-श्रुत-शब्द-विद्या-
वंशादिकन्दप्रतिमप्रतिष्ठान् ।
अनादिसिद्धान् सुमनःप्रबन्धै-
र्वर्णान् महिष्यामि जगत्प्रसिद्धान् ॥ (उपजाति) ६२

तद् यथा-

अर्हन्तमेकं शरणं श्रयध्वं, धर्मानहिंसाप्रभृतीन् कुरुध्वम् ।
अनाश्रवत्वाय सदा यतध्वं
विमृष्टसम्यक्सुलसावदाताः ॥ (उपजाति) ६३

अघं न लोकोत्तमचिन्तकानां, पुण्यं न मिथ्यात्विसमागतानाम् ।
दुःखं न सन्तोषवशंवदानां,
सुखं न सारम्भपरिग्रहाणाम् ॥ (उपजाति) ६४

अर्हन्तमन्तः स्मरतां न पापं, मिथ्यात्विभिः सङ्गकृतां न पुण्यम्।
सन्तोषसाम्राज्यजुषां न दुःखं,
परिग्रहारम्भपुषां न सौख्यम् ॥ (उपजाति) ६५

आचारमाजीवितमाश्रिताना–माशाविकाशैर हिताशयानाम् ।
आज्ञामिहाऽऽराध्यति कोऽपि धन्यः,
प्रदेशिवत् केशिमुनीश्वराणाम् ॥ (उपजाति) ६६

इष्टेष्विहामुत्र सुदुस्त्यजेषु, श्रीराम–सीतावदसङ्गतानाम् ।
इच्छानिवृत्त्या कपिलोपमानं,
गृह्णामि दुःखं ऋषिसत्तमानाम् ॥ (इन्द्रवज्रा) ६७

ईर्ष्यादिदोषत्यज ईश्वरत्वेऽपीहादिहीनाः सुखसङ्गमेऽपि ।
पुण्यैः सतामीक्षिततत्त्वमार्गा
भवन्ति वीरप्रभुवज्रतुल्याः ॥ (उपजाति) ६८

उभौ मनुष्यौ सुमनःपतीनां गोविन्दवद् गौतमवत् प्रशस्यौ ।
एको वदान्यो जगदीश्वरोऽपि,
ज्ञाताखिलार्थोऽपि परो विनीतः ॥ (उपजाति) ६९

उन्निद्रता शूरकराग्रजाग्रत्सरोरुहस्येव विकाशभाजः ।
कस्यापि राजत्यभयस्वभावं
प्रपद्यमानस्य मनःप्रसत्त्यै ॥ (उपजाति) ७०

ऊर्द्ध्वोर्द्ध्ववीक्षाप्रयताः सचेतना,
ऊनं प्रपश्यन्ति न के स्वमृद्धिभिः।
लोकोत्तरैः सच्चरितैः परं गुरुं
कर्तुं क्षमाः केऽपि दशार्णभद्रवत् ॥ (इन्द्रवंशा) ७१

ऋद्धिं प्रकृष्टामपि नष्टदृष्टां क्षणेन सन्ध्यामिव येऽवबुध्य ।
सनत्कुमारस्थितिमाजुषन्ते,
तेभ्यो भवेयं बलिरीश्वरेभ्यः ॥ (उपजाति) ७२

ऋषितां दधते न के बुधा ऋषिदत्ताचरितं निशम्य तत् ।
ऋजुता-मृदुता-क्षमा-ऽवनी-
ऋतुराजावतरप्रभाभरम् ॥ (वैतालीय) ७३

ॠकारवत् क्वापि पदे प्रतिष्ठा सर्वाङ्गवक्रस्य निशम्यते न ।
ऋजोः प्रसन्नानुजवत्तु जन्तोः,
पदे निवासः परमो(मे)ऽपि दृष्टः ॥ (उपजाति) ७४

ऌवर्णवक्रक्षणिकातरङ्गोन्मेषात्तमिश्रा सुपदार्थदृष्टौ ।
यादृक् सुखं तादृगहो सुखादौ,
सौमित्रिवत् केचन चिन्तयन्ति ॥ (उपजाति) ७५

ॡकारवत् प्राञ्जलतोज्झितस्य दण्डादृतेऽन्यत्र न हि प्रसङ्गः ।
किं नाम नाभूत् पुरतोऽर्हतोऽपि,
गोशालकस्याऽनवधिर्वधार्थः ॥ (इन्द्रवज्रा) ७६

एकत्वतत्त्वामृतसिन्धुमग्नाः, सनातने ब्रह्मपथे विलग्नाः ।
प्रत्येकबुद्धा नमिराजमुख्या
बाढं मदीये हृदये ध्वनन्ति ॥ (उपजाति) ७७

ऐश्वर्यसत्सङ्गमगेहदेह-प्राणप्रियास्नेहधनादि सर्वम् ।
तरङ्गभङ्गप्रतिमं विचिन्त्य
स्वालोचितं श्रीकरकण्डुपादैः ॥ (उपजाति) ७८

ओष्ठाविव द्वौ मिलितौ तपःशमौ,
सतां सदा मुख्यतयाऽपवर्गदौ ।
परस्परप्रीतिपरौ श्रुतौ नवा-
ऽनन्ताच्युतौ किं परलोकसाधकौ ? ॥ (उपजाति) ७९

औत्सुका(क्य)मग्र्यं गणयन्ति सात्त्विका,
दानोपकारव्रतधर्मनिर्मितौ ।
अहक्षये हन्त विलम्बितैः पथि,
श्रीनेमिनाथः प्रणतो न पाण्डवैः ॥ (उपजाति) ८०

अन्तर्विशुद्धिर्मनसः प्रसाद-श्चारित्रचर्या च बहिर्विशुद्धिः ।
द्विधा विशुद्धं सुभगं जयश्री-
र्वृणोत्यहो ! विष्णुमिव द्विधापि ॥ (उपजाति) ८१

अः सत्त्वमुक्तं र इतो रजो ह-स्तमो घखं मूर्ध्नि परात्मधाम ।
इत्यक्षयं पञ्चदशप्रभेदा
अर्हं समाश्रित्य न केऽत्र सिद्धाः ? ॥ (उपजाति) ८२

कलाः कलाकेलिकलङ्ककन्दली-
कुद्दालकल्पाः कलिकालरात्रयः ।
सतां यशोभद्रमुनीशितुः कथा-
प्रथा यशोभद्रशतप्रदायकाः ॥ (उपजाति) ८३

कः कलङ्कविकलोऽजनि लोके
कः कलानिधिरभूद् गुणगौरः ।
कः खलेषु पतितः पतितो न,
कः खिलं ऋषिपथं श्रयति स्म ॥ (स्वागता) ८४

कः पुरन्ध्रिभिरलाभि न रन्ध्रं, तृष्णया भण न कः परिभूतः ।
कः फणी वनकुटुम्बकरण्डा-
न्तर्गतः फलमवाप दुरन्तम् ॥ (स्वागता) ८५

कः प्रजेश-शिव-बुद्ध-बिडौजः-
केशवादिकगणोऽपि न जिग्ये ।
ऊर्मिभिर्भवसमुद्रभवाभि-
स्तं विनाऽवनितले जिनमेकम् ॥ (स्वागता) ८६

खलैः कषायैर्गलहस्तितात्मा, स शूलपाणिर्नरकान्धकूपे ।
पतन् महावीरजिनेश्वरेण,
संरक्षितोऽकारणवत्सलेन ॥ (उपजाति) ८७

गता न के वैषयिकैः सुखैर्विषै-
र्ग्लानिं परां द्वादशचक्रवर्तिवत् ।
महाम्बुवाहस्तनितैरिवाऽध्वगाः,
पारीन्द्रनादैरिव गन्धसिन्धुराः ॥ (उपजाति) ८८

घरट्टवृत्तोऽविरतिस्त्रिया यो, निरन्तरां भ्रान्तिमवापितोऽङ्गी ।
गुणान् कणान् हन्त पिनष्टि दुष्टः
स पुण्डरीकानुजवद् विनष्टः ॥ (उपेन्द्रवज्रा) ८९

ङ इव प्रकृतिवक्रः प्राकृतेऽपि प्रतिष्ठां
न भजति ङवते वा नाऽस्य बालोऽपि भद्रम् ।
तदिह सरलतायां विश्वतो वल्लभायां
मतिमुपचिनु मत्वा नागचन्द्रेतिवृत्तम् ॥ (मालिनी) ९०

चतुरचित्तचमत्कृतिकारिणी, चरणचर्च्यतमाऽत्र चराचरे ।
चतुरचारु चिराय चिलातिका-
तनयचिन्मयताऽचललोचना ॥ (द्रुतविलम्बित) ९१

छलयिता श्रुतकेवलिना मयि, स्खलयिता महतां मरुतामपि ।
दृढप्रहारि महामुनिना भवो,
विदलितः सकलोऽपि कलावता ॥ (द्रुतविलम्बित) ९२

जपतपःक्षपणैः कृपणैरलं, रल ! विचारय हारय मा रसम् ।
समतया मतया समयं नय-
न्नियतमेष्यति माषतुषत्विषम् ॥ (द्रुतविलम्बित) ९३

जलानिलस्त्रीपरिवर्जकानां, जगत्त्रयीपावनदर्शनानाम् ।
जडत्ववक्रत्वमुचां मुनीनां,
जयातिरेकाय कृता कथाऽपि ॥ (उपेन्द्रवज्रा) ९४

झटिति शैशवतोऽपि शिवं कुरु क्व रुषिते शमये शमनिष्टता ।
तदतिमुक्तकमौक्तिकलक्षणं
न च दधेः श्रवसो किमु भूषणम् ॥ (द्रुतविलम्बित) ९५

ञवदनार्जवशालिनि पृष्टतः कुपुरुषे पुरतः सरलेऽपि हि ।
मतमुपेक्षणमुक्तमिहागमे
न यदभव्यगुरोरपि गौरवम् ॥ (द्रुतविलम्बित) ९६

टलति कनकशैलो विश्वमध्यस्थताया-
स्त्रिभुवनगुरुलीलाक्षोभितात्मा कदापि ।
चलति न तु मुनीनां स्कन्दकाचार्यशिष्य-,
स्थिरचरितधराणामन्तरात्मा क्षयेऽपि ॥ (मालिनी) ९७

ठगमोदकैः प्रियतमावचनै-र्बडिशामिषैर्विविधवित्तभरैः ।
ऋषभाङ्गजस्य ऋषिभानुमतो
नमति स्म नाम न मतिः स्वमतात् ॥ (प्रमिताक्षरा) ९८

डमरुकरवरौद्रैः शैवशाक्यादिवाक्यैः,
कथमिव तव तावत् क्षीयतां मोहनिद्रा ।
अतिमधुरगभीरं पुष्पचूलेव याव-
ज्जिनवचनमुदारं जीव ! न श्रोष्यति त्वम् ॥ (मालिनी) ९९

ढक्का महानन्दपुरप्रयाणे क्ष्वेडा महामोहगजप्रहाणे ।
दिव्यो ध्वनिः कैश्चन विश्वभर्तु-
र्निशम्यते श्रीमरुदेवयेव ॥ (उपजाति) १००

णकारवद् ये सरलास्त्रिशुद्ध्या, तत्त्वत्रयी तान् वृणुते क्रमात् ते।
रत्नत्रयाभ्यासहतत्रिवेदा-
स्त्रैगुण्यमुक्ते महसि स्फुरन्ति ॥ (उपजाति) १०१

ण इवादौ मध्यं (ध्येऽ)न्ते, तपसा श्रितरेख एष हरिकेशः ।
कैः कैर्न पुरश्चके गीर्वाणैर्ब्राह्मणैः श्रमणैः ॥ १०२

तथ्यमेकममलं गृहाश्रमे, पात्रदानसुकृतं सखे ! श्रय ।
शालिभद्र-कृतपुण्य-चन्दना-
वीरभद्रयशसे स्पृहाऽस्ति चेत् ॥ (रथोद्धता) १०३

थटे प्रतीतिः प्रतिभाप्रतिष्ठा प्रभाप्रभावप्रभुताप्रियाणाम् ।
शीलेव हीलां न सुधीर्विधत्ते,
श्रुत्वा यशश्चेटकनन्दिनीनाम् ॥ (उपजाति) १०४

दक्षत्वदाक्षिण्यदयादमाङ्कुरो-
त्करादिकन्दं शिवसौख्यलग्नकम् ।
रजस्तमोमुक्तमनन्तसत्त्वभृत्
तपस्तताना ऽ ऽर्यमहागिरिर्गुरुः ॥ (उपजाति) १०५

धन्या इलातीसुतवद्विधिज्ञा, विचित्रदुःखार्पणशत्रुभूतम् ।
मात्राधिकेनेव महत्त्वशक्त्या
भवं हि भावेन पराभवन्ति ॥ (उपजाति) १०६

न हारहूरा हृदयं हरन्ते न शर्करा भाति च शर्कराभा ।
सुधा मुधा चेन्न ममाक्षवर्गः
सम्यग् निपीतार्द्रकुमारकीर्तेः ॥ (उपजाति) १०७

परापवादाश्रवणं परस्त्रिया-मदर्शनं श्रोत्रदृशोः शुचित्वकृत् ।
पैशून्यमुक्ती रसनाञ्चलस्य वै
अस्तेयमप्राणिवधोंऽह्रिहस्तयोः ॥ (उपजाति) १०८

पराङ्गनालिङ्गनवर्जनं तनोः
शौचं सतां तत्त्वविदो विदुः सदा ।
एवं शुचिः सत्पुरुषस्त्रिमार्गगा-(पा?)-
म्य(प्य?)भीष्यते स्वात्मविशुद्धिहेतवे ॥ (वंशस्थ) १०९

पश्य पश्य पवनैरिवोद्धतैः पर्वता इव नहि प्रकम्पिताः ।
वज्रकर्ण-कपिराज-कार्त्तिका-
स्तत्त्वनिर्णयविशुद्धबुद्धयः ॥ (रथोद्धता) ११०

फल्गु वल्गु जनताप्रतारणं, वेदवाक्यमपवादकारणम् ।
तं मरुन्तमखभञ्जनं विना,
को निवारयति दुःषमारके ॥ (रथोद्धता) १११

बध्यतेऽविकलधीः सुधीस्तु नो, वाङ्मनस्तनुविकल्पनागुणैः ।
उत्थितेन भवनादि दह्यते,
वह्निना न गगनं कदाचन ॥ (रथोद्धता) ११२

भद्रमस्तु भवभीतिभेदिनां, श्रीयुगादिजिन-शान्ति-नेमिनाम् ।
ये निरर्गलभवोत्सवोर्मिभिः,
सङ्गता अपि चिरं न रङ्गिताः ॥ (रथोद्धता) ११३

मणिपतेरसमैः सुमनःपते-रुपचिता बत ये शमसौरभैः ।
न कलिकालनिबन्धविगन्धयो,
विधुरयन्ति कदाचन तानहो ! ॥ (द्रुतविलम्बित) ११४

मत्वा क्षणं यदि जिनस्य तदाऽकरिष्यन्
पादाः प्रसादममृतोर्मिकिरा गिरा न ।
हा हन्त तत्कथममी फणिशूलपाणि-
मुख्यास्तमोमयगरज्वरिणोऽभविष्यन् ॥(वसन्ततिलका) ११५

यस्तनोत्यतनुशुद्धिमात्मनो, बन्धुदत्तचरितामृतार्णवे ।
रागनागगरलोर्मयो न तं,
मूर्च्छयन्ति विषमक्रमा अपि ॥ (रथोद्धता) ११६

यम-नियमा-ऽऽसन-प्राणा-यम-प्रत्याहार-धारणा-ध्यानम् ।
सुसमाधिरष्टधैवं, योगः शिवलक्ष्मियोगकरः ॥ ११७

रजस्तमःसत्त्वमयाशयानां, चिरक्षणस्थास्नुगुणप्रमाणे ।
रतिः क्रमात् कीर्तिशरीरधर्मे,
वैगुण्यभाजां तु शिवे मुनीनाम् ॥ (उपजाति) ११८

रत्नश्रवः-सम्भव-पद्मनाभ-नारायणानां चरितानि तानि ।
श्रुतानि केषां ददते न शान्तिं,
शीतावदातोन्नतिबन्धुराणि ॥ (उपजाति) ११९

लक्ष्ये विशन्त्यविरतेः पुरुषाधमा ये
ते प्राप्नुवन्ति जिनरक्षितवद् विपत्तिम् ।
श्रीवर्द्धमानचरणाम्बुजचञ्चरीका
अन्ये तु यान्ति जिनपालितवन्महत्त्वम् ॥(वसन्ततिलका)१२०

वर्द्धिष्णुमैत्री-मुदिता-ऽनुकम्पा-
माध्यस्थ्यमेध्यासमताप्रणीतम् ।
वक्षःस्थले कौस्तुभवच्चकास्ति,
समत्वमेकं पुरुषोत्तमानाम् ॥ (उपजाति) १२१

शमं शरीरे शतधा दधानः, शरण्यमेकं जिनमेव जानन् ।
शतक्रतोरप्यविकम्प्यचित्तः
शक्नोति शान्ताय पदाय गन्तुम् ॥ (उपजाति) १२२

षड्दृष्टिदृष्टान्तविदश्चतुर्थ-षष्ठादिनिष्ठारसिकात्मवृत्तेः ।
षड्भेदजीवावननिष्ठितस्य, षष्ठी यतेर्हस्तगतेव लेश्या ॥ १२३
(इन्द्रवज्रा)

सत्यं समाधिः समता समर्थता,
सहिष्णुता सत्त्वकला सशूकता ।
सम्यक्त्वसङ्गः सरलत्वसभ्यते,
सदा सतां सद्गतिसाक्षिणो गुणाः ॥ (उपजाति) १२४

हर्म्याणि रम्याणि रमाश्च रामा,
हर्म्यातिकाम्याभरणाभिरामाः ।
भवे भवे भाग्यभृतां भवेयुः,
सुदुर्लभः किन्तु जिनेन्द्रधर्मः ॥ (उपजाति) १२५

हंसः सतां लसति सद्गुरुभानुबोध्ये
योगाम्बुजे गृहि-यतिव्रजबीजकोशे ।
सम्यक्त्वनालजुषि शुद्धयमादिपत्रे,
पुण्यामृतोपचितमानसगर्भजाते ॥ (वसन्ततिलका) १२६

लक्ष्यैकभाग् द्वादशभावनारसे
लयं श्रयन् ध्यानचतुष्कपूरणे ।
लघुत्वमाज्ञाविचयादिचिन्तया
लब्ध्वोद्ध्र्वलोकान्तमुपैति चेतनः ॥ (उपजाति) १२७

क्षमामृदुत्वार्जवसत्यसंयमत्यागास्तपोऽकिञ्चनता सशौचता ।
ब्रह्मेति धर्मो दशधा जिनोदितः
स्याद् भूर्भुवःस्वःसुखसिद्धिदायकः ॥ (रथोद्धता) १२८

मङ्गलं निरवधि स्थिरा महाश्रीः परं शरणमुत्तमं महः ।
सिद्धसेनहृदयाधिदैवतं निर्मलं जयति जैनशासनम् ॥ १२९

# शास्त्रसन्देशमालाषड्विंशतिभागमध्ये ग्रथितानां ( ६१२ ) ग्रन्थानामकारादिक्रमः

(अङ्कैर्भागा विज्ञेयाः)


अ

अट्ठारसहस्सशीलंगाइरहा ( ५ )
अध्यात्मकल्पद्रुमः ( ९ )
अध्यात्मबिन्दुः ( १८ )
अध्यात्ममतपरीक्षा ( २१ )
अध्यात्मसारः ( ४ )
अध्यात्मोपनिषत् ( ४ )
अनङ्गदुजर्याष्टकम्( २५ )
अनुमानमातृका ( १६ )
अनेकान्तव्यवस्थाप्रकरणस्य मङ्गलप्रशस्ती ( ५ )
अनेकार्थनाममाला ( २२ )
अनेकार्थ-निघण्टुः ( २२ )
अनेकार्थसंग्रहकोषः ( २४ )
अन्तिमाऽऽराधना ( १४ )
अन्नायउंछकुलयं ( ७ )
अन्ययोगव्यवच्छेदद्वात्रिंशिका ( १६ )
अन्योक्तिशतकम् ( ६ )
अप्पविसोहिकुलयं ( ७ )
अभव्यकुलकम् ( ७ )
अभिधानचिन्तामणिनाममाला ( २४ )
अभिधानचिन्तामणिशेषनाममाला ( २४ )
अभिधानचिन्तामणिशिलोञ्छः ( २२ )
अ.ब.वि.ग.महादण्डकस्तोत्रम् ( २५ )
अयोगव्यवच्छेदद्वात्रिंशिका ( १६ )
अष्टकानि ( ३ )
अष्टविधकर्मस्वरूपम् ( २३ )

आ

आउरपच्चक्खाणं-१ ( १५ )
आउरपच्चक्खाणं-२ ( १५ )
आख्यानकमणिकोशः ( ८ )
आगम अष्टोत्तरी ( २१ )
आचारोपदेशः ( ११ )
आत्मघोषः ( २५ )
आत्मतत्त्वचिन्ताभावनाचूलिका ( ९ )
आत्मनिन्दाष्टकम् ( १४ )
आत्मप्रतिबोधदोहा ( २५ )
आत्मप्रबोधः ( १७ )
आत्मबोधकुलकम् ( ७ )
आत्महितकुलकम् ( ७ )
आत्मानुशासनकुलकम् ( ७ )
आत्मोपदेशमाला ( २५ )
आत्मानुशासनम् ( १४ )
आत्मानुशास्तिसंज्ञिका पञ्चविंशतिका ( १४ )
आत्मावबोधकुलकम् ( ७ )
आध्यात्मिकमतपरीक्षा ( ५ )
आप्तमीमांसा ( २२ )
आभाणशतकम् ( ६ )
आयुःसङ्ग्रहः( २६ )

आरात्रिक-वृत्तानि ( २२ )
आराधकविराधकचतुर्भङ्गी ( ४ )
आराधना ( १४ )
आराधनाप्रकरणम् ( २१ )
आराधनाप्रकरणम् ( २५ )
आराहणा ( १४ )
आराहणाकुलयं ( ७ )
आराहणापडागा-१ ( १४ )
आराहणापडागा-२ ( १४ )
आराहणापणगं ( १४ )
आराहणापयरणं ( १४ )
आर्षभीयचरितमहाकाव्यम् ( ५ )
आलोचनाग्रहणविधि
प्रकरणम् ( २२ )
आलोचनाविधान ( २२ )
आलोयणाकुलयं ( ७ )
आशाम्बरहित शिक्षा ( २५ )

इ

इन्द्रियपराजयशतकम् ( ६ )
इरियावहिकुलकम् ( २१ )
ईर्यापथिकीमिथ्यादुष्कृतकुलकम् ( ७ )
ईर्यापथिकीषट्त्रिंशिका ( १६ )
ईर्यापथिकीषट्त्रिंशिका ( २५ )

उ

उत्पादादिसिद्धिः ( १६ )
उत्सूत्रपदोद्घाटनकुलकम् ( ७ )
उद्गच्छत्सूर्यबिम्बाष्टकम् ( २५ )
उपदेशकल्पवल्लिः ( ११ )
उपदेशकुलकम्-१ ( ७ )
उपदेशकुलकम्-२ ( ७ )
उपदेशकुलकम्-३ ( २१ )
उपदेशचिन्तामणिः ( १० )
उपदेशतरङ्गिणी ( २१ )
उपदेशपद ( १ )
उपदेशप्रदीपः ( १२ )
उपदेशरत्नकोशः ( ८ )
उपदेशरत्नाकरः ( ८ )
उपदेशरत्नाकरः ( २५ )
उपदेश( धर्म )रसायनरासः ( ८ )
उपदेशरहस्यम् ( ४ )
उपदेशशतकम् ( ६ )
उपदेशसप्ततिः ( ११ )
उपदेशसप्ततिका ( ८ )
उपदेशसारः ( ११ )
उपदेशामृताकुलकम् ( ७ )
उपधानवाहिप्रशंसा
प्रकरणम् ( २२ )
उपधानविधिः-१ ( १० )
उपधानविधिः-२ ( १० )
उपमितिगतक्षमामाहात्म्यम् ( २५ )
उवएसचउक्ककुलयं-१ ( ७ )
उवएसचउक्ककुलयं-२ ( ७ )
उवएसमाला ( ८ )
उवहाणपइट्ठापंचासग ( २२ )

ऋ

ऋषभशतकम् ( ६ )
ऋषिमण्डलस्तवः ( १२ )
ऋषिमण्डलस्तवः ( २५ )

ए

एकविंशतिद्वात्रिंशिका: ( १६ )

एकविंशतिस्थानप्रकरणम् ( २३ )

एकाक्षरनाममाला ( २२ )

एकाक्षरनाममालिका ( २२ )

ऐन्द्रस्तुतय: ( ५ )

औ

औष्ट्रिकमतोत्सूत्रोद्घाटनकुलकम् ( ७ )

अं

अंगुलसत्तरी ( १३ )

क

कथाकोष: ( १२ )

कथानककोश: ( १२ )

कर्पूरप्रकर: ( १२ )

कर्मप्रकृति: ( १३ )

कर्मप्रकृति ( २६ )

कर्मविपाककुलकम् ( ७ )

कर्मविपाकाख्य: प्रथम: प्राचीनकर्मग्रन्थ: ( १३ )

कर्मसंवेधप्रकरण ( २३ )

कर्मस्तवभाष्यम् ( २३ )

कर्मस्तवाख्य: द्वितीय: प्राचीनकर्मग्रन्थ: ( १३ )

कम्मबत्तीसी ( १३ )

कविकल्पद्रुम: ( १८ )

कस्तूरीप्रकर: ( १२ )

कायस्थितिस्तोत्रम् ( १३ )

कालचक्रकुलकम् ( २६ )

कालवियारसयं ( २६ )

कालसप्ततिका ( १३ )

कालस्वरूपकुलकम् ( ७ )

कुमारविहारशतकम् ( ६ )

कुशलोपदेशकोश ( २१ )

कूपदृष्टान्तविशदीकरणम् ( ५ )

कृष्णराजीविमानविचार: ( १३ )

केवलिभुक्तिप्रकरणम् ( १६ )

क्ष

क्षपकस्याऽऽलोचनाऽन्ते-भावना ( २२ )

क्षमाकुलकम् ( ७ )

क्षान्तिकुलकम् ( ७ )

क्षुल्लकभवावलि: ( १३ )

ख

खामणाकुलयं ( १ ) ( ७ )

खामणाकुलयं ( २ ) ( ७ )

ग

गणधरसार्धशतकम् ( ६ )

गणरत्नमहोदधि: ( २६ )

गणिगणिन्योर्लक्षणावली ( २२ )

गाङ्गेयभङ्गप्रकरणम्-१ ( १५ )

गाङ्गेयभङ्गप्रकरणम्-२ ( १५ )

गुणकित्त्व-षोडशिका ( २६ )

गुणस्थानक्रमारोह: ( १३ )

गुणानुरागकुलकम् ( ७ )

गुरुगुणषट्त्रिंशत्षट्त्रिंशिका कुलकम् ( ७ )

गुरुतत्त्वप्रदीपः ( १६ )
गुरुतत्त्वविनिश्चयः ( ५ )
गुरु दर्शनहर्षकुलकम् ( ७ )
गुरु महात्म्यं कुलकम् ( २१ )
गुरु वन्दनभाष्यम् ( २२ )
गुरु विरहविलापः ( १४ )
गुरु स्थापनाशतक ( २१ )
गोडीपार्श्वस्तवनम् ( ५ )
गौतमकुलकम् ( ७ )

घ

घनगणितसंग्रहगाथाः ( १८ )

च

चंदावेज्झयं पइण्णयं ( १५ )
चउसरणपइन्नयं ( १५ )
चक्षुरप्राप्यकारितावादः ( २५ )
चतुर्गतिजीवक्षपणकानि ( १४ )
चतुर्दशजीवस्थानेषु जघन्योत्कृष्टपदे ( १३ )
चन्द्रसूर्यमण्डलविचारः ( २६ )
चरणाकरणमूलोत्तरगुण ( १८ )
चर्चरी ( २१ )
चारित्रमनोरथमाला ( ८ )
चतुर्विधधर्मस्वरूपम् ( २५ )
चित्तशुद्धिफलम् ( १८ )
चेइयवंदणमहाभासं ( १० )
चैत्यवन्दनकुलकम् ( २१ )
चैत्यवन्दनभाष्यम् ( २२ )

ज

जंबूस्वामि कुलकम् ( २१ )
जघन्योत्कृष्टपद एककालं
गुणस्थानकेषु ( १३ )
जयन्तीप्रकरणम् ( २२ )
जल्पकल्पलता ( १६ )
जिनप्रतिमास्तोत्रम् ( १ )
जिनबिम्बप्रतिष्ठाविधिः ( १० )
जिनशतकम्-१ ( ६ )
जिनशतकम्-२ ( ६ )
जीवजोणिभावणाकुलयं ( ७ )
जीवदयाप्रकरणं ( ८ )
जीवविचारस्तवनम् ( २६ )
जीवव्यवस्थापनाषट्त्रिंशतिका ( २२ )
जीवसमासः ( १३ )
जीवसरूव-चउवीसिया ( २६ )
जीवाऽजीव कर्माष्टकप्रकरणम् ( २२ )
जीवादिगणितसंग्रहगाथाः ( १८ )
जीवाणुसट्ठि संधि ( २५ )
जीवानुशासनम् ( १४ )
जीवानुशास्तिकुलकम् ( ७ )
जीवाभिगमसंग्रहणी ( १५ )
जीवायुप्पमाणकुलयं ( २१ )
जैनतत्त्वसारः ( १६ )
जैनविहारशतकम् ( २१ )
जैनस्याद्वादमुक्तावली ( १६ )
जोइसकरंडगं पइण्णयं ( १५ )
जोगविहाणपयरणं ( २२ )

ज्ञ

ज्ञाताधर्मकथोपनयगाथाः ( १५ )
ज्ञानप्रकाशकुलकम् ( ७ )
ज्ञानपञ्चकविवरणम् ( २५ )

ज्ञानसारः ( ४ )
ज्ञानार्णवः ( ५ )

त

तत्त्वतरङ्गिणी ( १६ )
तत्त्वबोधतरङ्गिणी ( १२ )
तत्त्वामृतम् ( ९ )
तपःकुलकम् ( ७ )
तपःकुलकम् ( २१ )
तित्थोगालिपइन्नयं ( १५ )
तेवड्डिसिलगापुरिसवियारो ( २६ )
त्रिशतत्रिषष्टिपाखण्डस्वरूप स्तोत्रम् ( १५ )
त्रिषष्टिध्यानकथानककुलकम् ( २१ )
त्रिषष्टीयदेशनासंग्रहः ( ११ )
त्रैलोक्यदीपिका ( बृहत्संग्रहणी ) ( २३ )
तृणाष्टकम् ( २५ )

द

दंसणसुद्धिपयरणं ( १० )
दर्शननियमकुलकम् ( ७ )
दशश्रावककुलकम् ( ७ )
दानकुलकम् ( ७ )
दानविधिः ( १० )
दानषट्त्रिंशिका ( ९ )
दानादिप्रकरणम् ( १२ )
दानोपदेशमाला ( ८ )
दिक्चतुष्कजीवाल्पबहुत्वं ( २२ )
दीवसागरपन्नत्ति ( १५ )
दुःषमगण्डिका ( २५ )
दृष्टान्तशतकम् ( २१ )
दृष्टान्तशतकम्-१ ( ६ )
दृष्टान्तशतकम्-२ ( ६ )
देवेन्द्रनरकेन्द्रप्रकरणम् ( १३ )
देशनाशतकम् ( ६ )
देशीनाममाला ( २४ )
देहकुलकम् ( ७ )
देहस्थितिस्तवः ( १३ )
द्रव्यसप्ततिका ( २२ )
द्रव्यस्तवसमर्थनप्रकरणम् ( २५ )
द्वात्रिंशद्द्वात्रिंशिकाः ( ४ )
द्वादश-कुलकम् ( ७ )
द्वादशभावना ( २१ )
द्वादशभावना ( २१ )
द्वादश भावनाः ( २१ )
द्वादशव्रतस्वरूपम् ( १० )
द्वादशाङ्गीपदप्रमाणकुलकम् ( ७ )
द्वाविंशतिपरीषहाः ( २१ )

ध

धनञ्जयनाममाला ( २१ )
धनुःपृष्ठबाहासंग्रहगाथाः ( १८ )
धम्मारिहगुणोवएसकुलयं ( ७ )
धम्मोवएसकुलयं ( ७ )
धर्मपरीक्षा ( ५ )
धर्मबिन्दुः ( ३ )
धर्मरत्नप्रकरणम् ( १० )
धर्मरत्नकरण्डकः ( ११ )
धर्मस्वरूप-दर्शनम् ( २५ )
धर्मविधिः ( ८ )
धर्मशिक्षा ( ९ )

धर्मसंग्रहणि: ( १ )
धर्मसंग्रहः ( ११ )
धर्माचार्यबहुमानकुलकम् ( ७ )
धर्माराधनशिक्षा ( २१ )
धर्मोद्यमकुलकम् ( ७ )
धर्मोपदेशः ( ९ )
धर्मोपदेशमाला ( ८ )
धर्मोपदेशश्लोकाः ( २१ )
धर्म्माधर्म्मविचारकुलकम् ( २१ )
धर्म्मोपदेशकुलकम् ( ७ )
धूर्ताख्यानम् ( ३ )
धूमावली ( ३ )
ध्यानदीपिका ( १८ )
ध्यानशतकम् ( ६ )

न

नंदणरायरिसिस्स
अन्तिमाऽऽराहना ( १४ )
नंदनऋषि आराधना ( २५ )
नन्दीश्वरस्तवः ( १३ )
नमस्कार माहात्म्यम् ( २१ )
नमस्कारस्तवः ( १८ )
नयकर्णिका ( १६ )
नयोपदेशः ( ५ )
नरकवर्णनवृत्तानि ( २५ )
नरभवदिट्ठंतोवणयमाला ( १२ )
नवकारफलकुलकम् ( ७ )
नवतत्त्वप्रकरणम् ( २२ )
नवतत्त्वप्रकरणम् ( २२ )
नवतत्त्वभाष्यम् ( १३ )
नवतत्त्वम् ( १३ )
नवतत्त्वसंवेदनम् ( १३ )
नवपदप्रकरणम् ( १० )
नवपदमाहात्म्य गर्भित
प्रकरणम् ( २१ )
नवपद विषयक देशना ( २५ )
नवपदाराधनविधिः ( २५ )
नवसूर्यपबृंहणाऽनुशास्ती ( २२ )
नव्यमहत्तराऽनुशास्तिः ( २२ )
नव्यलघुक्षेत्रसमासः ( २६ )
नानाचित्तप्रकरणम् ( ३ )
नानावृत्तकप्रकरणम् ( २१ )
नारीशीलरक्षाकुलकम् ( ७ )
निगोदषट्त्रिंशिका ( १५ )
निघण्टुशेषः ( २४ )
नीतिधनदशतकम् ( २१ )
नूतनगणिगच्छनुशास्तिः ( २२ )
नूतनाचार्याय हितशिक्षा ( ९ )
न्यायखण्डखाद्याऽपरनामा-
महावीरस्तवः ( ५ )
न्यायावतारः ( १६ )
न्यायावतारसूत्रवार्तिकम् ( १६ )

प

पंचवत्थुगं ( २ )
पञ्चकपरिहाणिः ( २२ )
पञ्चनिर्ग्रन्थी ( १५ )

पञ्चलिङ्गीप्रकरणम् ( १५ )
पञ्चवर्गपरिहारनाममाला ( २२ )
पञ्चसङ्ग्रहः ( १३ )
पञ्चसंयतप्रकरणम् ( १५ )
पञ्चाशकानि ( १ )
पज्जंताराहणा ( १४ )
पट्टावलीविसुद्धी ( १६ )
पडिलेहणाविचारकुलकम् ( ७ )
पदार्थस्थापनासंग्रहः ( १७ )
पद्मानन्दशतकम् ( ६ )
परमज्योतिपञ्चविंशतिका ( ५ )
परमसुख-द्वात्रिंशिका ( २५ )
परमाणुखण्डषट्त्रिंशिका ( १५ )
परमात्मपञ्चविंशतिका ( ५ )
परमानन्दपञ्चविंशतिः ( ९ )
पर्यन्ताराधनाकुलकम् ( ७ )
पर्युषणादशशतकम् ( १६ )
पव्वज्जाविहाणकुलयं ( ७ )
पाइअलच्छीनाममाला ( २२ )
पाक्षिक गाथा विचार ( २२ )
पाक्षिकपर्वसारविचारः ( २२ )
पाक्षिकसप्ततिका ( २२ )
पिंडालोयणाविहाणाओ पयरणं ( २२ )
पिण्डविशुद्धिः ( १० )
पुण्डरीकतीर्थपतीस्तोत्रम् ( ५ )
पुण्यकुलकम् ( ७ )
पुद्गलपरावर्तस्तवनम् ( १३ )
पुद्गलषट्त्रिंशिका ( १५ )
पुष्पमाला ( ८ )
पूजा-चतुर्विंशतिका ( २५ )
पूजाविधिः ( ११ )
पोषधविधि संग्रहणीगाथाः ( २२ )
पोसहविही ( १० )
पौषधषट्त्रिंशिका ( १६ )
प्रकृतिबन्धविचारः ( २६ )
प्रकृतिविच्छेदप्रकरणम् ( २३ )
प्रकृतिस्वरूपसंरूपणं
प्रकरणम् ( २३ )
प्रज्ञापनोपाङ्गतृतीयपदसंग्रहणी ( १५ )
प्रज्ञाप्रकाशषट्त्रिंशिका ( २५ )
प्रतरप्रमाणसंग्रहगाथाः ( १८ )
प्रतिक्रमणसमाचारी ( २२ )
प्रतिमार्थं काष्ठपाषाणपरीक्षा ( २२ )
प्रतिमाशतकम् ( ४ )
प्रतिष्ठाविधिः ( २२ )
प्रतिष्ठाविधिः ( २२ )
प्रतिष्ठासंग्रहकाव्यम् ( २२ )
प्रतिसमयजागृतिकुलकम् ( ७ )
प्रत्याख्यानकुलकम् ( २१ )
प्रत्याख्यान कुलकम् ( २१ )
प्रत्याख्यानभाष्यम् ( २१ )
प्रत्याख्यानस्वरूपम् ( १० )
प्रबोधचिन्तामणिः ( ९ )
प्रभाते जीवानुशासनम् ( १४ )
प्रमाणनयतत्त्वालोकालङ्कारः ( १६ )
प्रमाणप्रकाशः ( १६ )

प्रमाणमीमांसा ( १६ )
प्रमादपरिहारकुलकम् ( ७ )
प्रमालक्षणम् ( २१ )
प्रवचनपरीक्षा ( १६ )
प्रवचनसारोद्धारः ( १७ )
प्रव्रज्याविधानकुलकम् ( ७ )
प्रशमरतिः ( ९ )
प्रश्नद्वात्रिंशिका ( १६ )
प्रश्नशतकम् ( ६ )
प्रश्नावली ( २६ )
प्रश्नोत्तररत्नमाला ( १२ )
प्राकृतसंवेगामृतपद्धतिः ( १४ )
प्रातःकालिकजिनस्तुतिः ( ९ )

ब

बन्धस्वामित्वप्रकरणम् ( २३ )
बन्धस्वामित्वाख्यः तृतीयः प्राचीनकर्मग्रन्थः ( १३ )
बन्धषट्त्रिंशिका ( १५ )
बन्धहेतूदयभङ्गप्रकरणसमाप्तिगते द्वे प्रकरणे ( ५ )
बन्धोदयसत्ता ( १३ )
बालावबोधप्रकरण ( २१ )
बिम्बपरीक्षा ( २२ )
बिम्बपूजापरीक्षा ( २२ )
बोटिकनिराकरणम् ( २६ )
बोटिकोच्चाटनं वादस्थानकम् ( २६ )
बृहत्क्षेत्रसमास ( २३ )
बृहत्संग्रहणी ( २३ )
बृहद्वन्दनकभाष्यम् ( १० )

भ

भवभावना ( ८ )
भावकुलकम् ( ७ )
भावनाकुलकम् ( २१ )
भावनाशतकम् ( ६ )
भावप्रकरणम् ( १३ )
भाषारहस्यम् ( ५ )
भोजनपूर्वचिन्तागाथाः ( ८ )

म

मंगलकुलयं ( ७ )
मण्डलप्रकरणम् ( १८ )
मदादिविपाककुलकम् ( ७ )
मनुष्यभवदुर्लभता ( ९ )
मनःस्थिरीकरणप्रकरणम् ( २६ )
मनोनिग्रहभावनाकुलकम् ( ७ )
महामुनि-स्तवः ( २५ )
महावीरविज्ञप्तिद्वात्रिंशिका ( २१ )
महासतीकुलकम् ( ७ )
मार्गपरिशुद्धिः ( ५ )
मार्ग्गणासु बंधहेतूदयत्रिभङ्गी ( १३ )
मालोपबृंहणा ( २२ )
मिच्छादुक्कडवोसिरणविहि कुलयं ( ७ )
मिथ्यात्वकुलकम् ( ७ )
मिथ्यात्वमथनकुलकम् ( ७ )

मिथ्यात्वविचारकुलकम् ( ७ )
मिथ्यात्वस्थानविवरण
कुलकम् ( ७ )
मुखवस्त्रिकास्थापनकुलकम् ( ७ )
मूर्खशतकम् ( २१ )
मूलशुद्धिः ( १० )
मूलशुद्धि प्रकरणम् ( २५ )
मृत्युमहोत्सवः ( १४ )
मोक्षोपदेशपञ्चाशकम् ( ९ )

य

यतिदिनकृत्यम् ( ११ )
यतिदिनचर्या ( १० )
यतिलक्षणसमुच्चयः ( ४ )
यतिशिक्षापञ्चाशिका ( ८ )
यात्रास्तवः ( ११ )
युक्त्यनुशासनम् ( १६ )
युक्तिप्रकाशः ( १६ )
युक्तिप्रबोधः ( १६ )
योगदृष्टिसमुच्चयः ( ३ )
योगप्रदीपः ( १२ )
योगबिन्दुः ( ३ )
योगशतकम् ( ३ )
योगशास्त्रम् ( १८ )
योगसार ( २१ )
योगानुष्ठानकुलकम् ( ७ )
योगोद्वाहिलक्षणावली ( २२ )
योनिस्तवः ( १३ )

र

रजोष्टकम् ( २५ )
रत्नत्रयकुलकम् ( ७ )
रत्नसञ्चयः ( १७ )
रोहिणीज्ञातोपनयः ( २२ )

ल

लघुकर्मविपाकः ( २६ )
लघुक्षेत्रसमास ( २३ )
लघुप्रवचनसारोद्धारः ( १७ )
लघुशतकभाष्य ( २३ )
लघ्वल्पबहुत्वप्रकरणम् ( १३ )
लिङ्गानुशासनम् ( २४ )
लिङ्गानुशासनम् ( २६ )
लोकतत्त्वनिर्णयः ( ३ )
लोकनालिकाद्वात्रिंशिका ( १३ )

व

वाक्यप्रकाशः ( १८ )
वाणारस्यां कृतं
श्रीपार्श्वनाथजिनस्तोत्रम् ( ५ )
विंशतिर्विंशिकाः ( ३ )
विचारपञ्चाशिका ( १३ )
विचारसप्ततिका ( १७ )
विचारसारः ( १७ )
विचारस्तोत्रम् ( २५ )
विजयप्रभसूरिक्षामणक
विज्ञप्तिः ( ५ )
विजयप्रभसूरिस्वाध्यायः ( ५ )
विजयोल्लासमहाकाव्यम् ( ५ )

विद्वच्चिन्तामणि: ( २२ )
विद्वत्प्रबोधशास्त्रम् ( २२ )
विद्वद्गोष्ठी ( १२ )
विभक्तिविचार: ( १५ )
विरतिफलकुलकम् ( ७ )
विविधतपोदिनाङ्ककुलकम् ( ७ )
विवेककुलकम् ( ७ )
विवेकमञ्जरी ( ८ )
विशेष-णवति: ( १५ )
विषयविरक्तिकुलकम् ( ७ )
विसयनिंदाकुलयं ( २१ )
वीरस्तव: ( १५ )
वैराग्यकल्पलता ( १९+२० )
वैराग्यकुलकम् ( २५ )
वैराग्यधनदशतकम् ( २१ )
वैराग्यप्रेरणम् ( २५ )
वैराग्यरङ्गकुलकम् ( २१ )
वैराग्यरसायनम् ( ८ )
वैराग्यशतकम् ( ६ )
व्यवहारकुलकम् ( ७ )
व्याख्यानविधिशतकम् ( ६ )

श

शङ्खेश्वरपार्श्वजिनस्तोत्रम्-१ ( ५ )
शङ्खेश्वरपार्श्वनाथस्तोत्रम्-२ ( ५ )
शङ्खेश्वरपार्श्वनाथस्तोत्रम्-३ ( ५ )
शतकप्रकरणभाष्यम् ( २३ )
शतकसंज्ञक: पञ्चम:
कर्मग्रन्थ: ( २३ )
शतपञ्चाशितिका संग्रहणी ( २१ )
शमीनपार्श्वस्तोत्रम् ( ५ )
शब्दरत्नाकर: ( २२ )
शारदीया नाममाला ( २२ )
शास्त्रवार्तासमुच्चय: ( ३ )
शीलकुलकम् ( ७ )
शीलोदाहृतिकल्पवल्ली ( २५ )
शीलोपदेशमाला ( ८ )
शृङ्गारमण्डनम् ( २१ )
शृङ्गारवैराग्यतरङ्गिणी ( २१ )
शोकनिवारणकुलकम् ( ७ )

श्र

श्राद्धकुलकम् ( २५ )
श्राद्धदिनकृत्यम् ( १० )
श्राद्धविधि: ( १० )
श्रावकधर्मकृत्यम् ( ११ )
श्रावकधर्मविधि: ( ३ )
श्रावकप्रज्ञप्ति: ( १० )
श्रावकप्रायश्चित्तसामाचारीविधि ( २५ )
श्रावकविधि: ( २२ )
श्रावकव्रतकुलकम् ( २१ )
श्रावकव्रतभङ्गप्रकरणम् ( १८ )
श्रीकातन्त्रविभ्रमसूत्रम् ( १८ )
श्रीमद्गीता-तत्त्वगीता ( १८ )
श्रुतस्तव: ( २१ )
श्रुतास्वाद: ( ८ )
श्रृङ्गारधनदशतकम् ( २१ )
श्रृङ्गारशतकाव्यम् ( २१ )
श्रृङ्गारवैराग्यतरङ्गिणी ( १२ )

ष

षट्स्थानकम् ( १३ )
षडशीतिनामा चतुर्थः
प्राचीनकर्मग्रन्थः ( १३ )
षडशीतिभाष्यम् ( २३ )
षड्दर्शनपरिक्रमः ( १६ )
षड्दर्शन कल्पलता ( २५ )
षड्दर्शनसमुच्चयः-१ ( २ )
षड्दर्शनसमुच्चयः-२ ( १६ )
षड्द्रव्यसङ्ग्रहः ( १३ )
षड्विधाऽन्तिमाऽऽराधना ( १४ )
षष्ठिशतकम् ( ६ )
षोडशकप्रकरणम् ( ३ )
षोडशश्लोकी ( २१ )

स

संग्रहशतकम् ( ६ )
संज्ञाकुलकम् ( ७ )
संज्ञाधिकारः ( १८ )
संबोधप्रकरणम् ( २ )
संबोधसत्तरि ( २१ )
संयम मंजरी ( २२ )
संविज्ञसाधुयोग्यनियम
कुलकम् ( ७ )
संवेग कुलकम् ( २५ )
संवेग कुलकम् ( २५ )
संवेगकुलयं ( ७ )
संवेगद्रुमकन्दली ( ९ )
संवेगमंजरीकुलयं ( ७ )
संवेगरंगमाला ( १४ )
संवेगामृतम् ( १८ )
संसारे नत्थि सुहं ( २५ )
सङ्घपट्टकः ( २१ )
सङ्घस्वरूपकुलकम् ( ७ )
सज्जनचित्तवल्लभः ( ९ )
सन्देहदोलावली ( १६ )
सन्देहसमुच्चयः ( २६ )
सभापञ्चकप्रकरणम् ( १८ )
सप्ततिका-टिप्पनकम् ( २६ )
सप्ततिकाभाष्यम् ( १३ )
सप्ततिकाभिधः षष्ठः
कर्मग्रन्थः ( २३ )
सप्ततिकासारम् ( २३ )
सप्ततिशतकस्थानप्रकरणम् ( २३ )
सप्तपदीशास्त्रम् ( २२ )
समताशतक ( ६ )
समवसरणप्रकरणम् ( १३ )
समवसरणरचनाकल्पः ( २३ )
समवसरणस्तोत्रम् ( १३ )
समाधिशतक ( ६ )
समाधिशतकम् ( ६ )
समाधिसाम्यद्वात्रिंशिका ( ४ )
सम्बन्धपरीक्षा ( २६ )
सम्मतिसूत्रम् ( १६ )
सम्मत्तकुलयं-१ ( ७ )
सम्मत्तुप्पायविही कुलकम् ( ७ )
सम्यक्त्वकुलकम्-२ ( ७ )
सम्यक्त्वकुलकम्-३ ( ७ )
सम्यक्त्वपरीक्षा ( १६ )

सम्यक्त्वरहस्य प्रकरणम् ( २५ )
सम्यक्त्वसप्तति: ( १० )
सम्यक्त्व स्तव ( २२ )
सम्यक्त्वस्वरूपकुलकम् ( ७ )
सर्वजीवशरीरावगाहनास्तव: ( २२ )
सर्वज्ञशतकम् ( ६ )
सर्वज्ञसिद्धि: ( २ )
सर्वतीर्थमहर्षिकुलकम् ( ७ )
सर्वश्रीजिनसाधारणस्तवनम् ( २ )
साधर्मिकवात्सल्यकुलकम् ( ७ )
साधर्मिकवात्सल्यकुलकम् ( २१ )
साधु स्थापनाधिकार ( २२ )
साध्वाचारषट्त्रिंशिका ( २५ )
सामाचारी ( ४ )
सामान्यगुणोपदेशकुलकम् ( ७ )
साम्यशतकम् ( ६ )
सारसमुच्चयकुलकम् ( २५ )
सारावलीपइण्णयं ( १५ )
सार्द्धशतकभाष्यम् ( २३ )
सिद्धदण्डिकास्तव: ( १३ )
सिद्धपञ्चाशिका ( १३ )
सिद्धप्राभृतम् ( १३ )
सिद्धिमातृका ( २६ )
सिद्धसहस्रनामकोश: ( ५ )
सिद्धान्तसारोद्धार: ( १८ )
सुक्तसंग्रह: ( २५ )
सुक्ष्मार्थविचारसारोद्धार: ( १५ )
सुगुरु गुणसंथवसत्तरिया ( २१ )
सुभाषिताष्टकानि ( १२ )
सुभाषित-अष्टकानि ( २५ )
सुमिणसित्तरी ( ८ )
सूक्तरत्नावली-१ ( १२ )
सूक्तरत्नावली-२ ( १२ )
सूक्तिमुक्तावली ( १२ )
सूक्ष्मार्थसंग्रहप्रकरणम् ( २३ )
सूक्ष्मार्थसप्ततिप्रकरणम् ( १८ )
सूत्रकृताङ्गाद्यचतुरध्ययनाऽ-
नुक्रमगाथा: ( १५ )
स्तवपरिज्ञा ( १० )
स्त्रीनिर्वाणप्रकरणम् ( १६ )
स्त्रीवास्तविकताप्रकरणम् ( ८ )
स्थापनापञ्चाशिका ( २२ )
स्याद्वादकलिका ( १६ )
स्याद्वादपुष्पकलिका ( २५ )
स्याद्वादभाषा ( १६ )
स्याद्वादमुक्तावली ( १६ )
स्यादिशब्दसमुच्चय: ( २६ )

### ह

हिंसाफलाष्टकम् ( ३ )
हिओवएस ( ८ )
हिङ्गुलप्रकरणम् ( १२ )
हितशिक्षाकुलक ( २१ )
हिताचरणम्( २५ )
हैमनामामालाशिलोञ्छ: ( २६ )
हैमविभ्रम: ( २२ )
हृदयप्रदीपषट्त्रिंशिका ( ९ )

टोटल ग्रन्थ - ६१२

# शास्त्रसंदेशमाला

१ से २४ शास्त्रसंदेशमाला- १ से २४

२५. आगमपद्यानाम् अकारादिक्रमेण अनुक्रमणिका-१

२६. प्राकृतपद्यानाम् अकारादिक्रमेण अनुक्रमणिका-१

२७. संस्कृतपद्यानाम् अकारादिक्रमेण अनुक्रमणिका-१

२८. त्रिषष्टिशलाकापुरूषचरित्र-श्लोकानाम् अकारादिक्रमेण अनुक्रमणिका-४

२९. संवेगरंगशाला

३०. शास्त्रसंदेशमाला- २५

३१. शास्त्रसंदेशमाला- २६

३२. से ५१ स्तोत्रसंदेशमाला- १ से २०